७ मूर्ध्निरेफं –क, ख, ग, घ, ङ, च, ज
८ रसनायुक्तं –ङ, च, ज
९ चन्द्रबीजं –घ, ङ, च, ज । संशोधित पाठ–नादयुक्तं ।
१० नादयुक्तं –क, ख, ग । शान्तयुक्तं स्वर्गयुक्तं चैवं –ङ, च, ज
११ तत्पञ्चाश –ग, घ
१२ यो पाठ मातृका ङ र चमा छैन ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

धिनयोर्मध्यभागे[१३] च यकारद्वयमेव च ।
तत्र तत्र[१४] महादेवि[१५] अनन्तश्रुतिरेव च ।। ११ ।।
इति जप्त्वा महेशानि मुक्तो भवति तत्क्षणात् ।
अन्त्ययोकारयोः[१६] स्थाने यकारं इति यः पठेत्[१७] ।। १२ ।।
स चाण्डाल इति ख्यातो[१८] ब्रह्महत्या दिने दिने[१९] ।
अत एव महेशानि तव स्नेहात् प्रकाशितम् ।। १३ ।।
सावित्री परमा विद्या त्रैलोक्येषु च दुर्लभा ।
अस्या ग्रहणमात्रेण भूपूज्यो[२०] नात्र संशयः ।। १४ ।।
अङ्गन्यासस्य मन्त्रं[२१] यत्तच्छृणुष्व प्रियंवदे ।
प्रणवद्वयं च हृत्पद्मे भूःकारं शीर्षदेशके ।। १५ ।।
भुवः शिखायां स्वःकारं कवचे विन्यसेत्[२२] सुधीः ।
नेत्रत्रये[२३] भूर्भुव स्वः स्वःकारं करयुग्मके ।। १६ ।।
नमः स्वाहा वषट् हुँ[२४] च वौषट् फट् क्रमतो न्यसेत् ।
ध्यानं श्रृणु वरारोहे यथा ध्यात्वा यजेन्नरः ।।१७ ।।
श्वेतवर्णा समुद्दिष्य कौशेयवसना तथा ।
श्वेतैर्विलेपनैः[२५] पुष्पैरलङ्कारैश्च भूषिता ।। १८ ।।
आदित्यमण्डलान्तःस्था ब्रह्मलोकं गताऽथवा[२६] ।
अक्षसूत्रधरा देवी पद्मासनगताऽथवा[२७] ।। १९ ।।
ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि ।
प्रियं देवानामनाधृष्टं देवयजनमसि ।।

---

१३ धियोयोर्मध्यभागे –क, ख, ग, घ
१४ अत एव –ङ, च, ज
१५ महेशानि -ङ
१६ अन्त्ययकारयोः –घ, ङ, च, ज
१७ योकारत्रितयः पठेत् –क
१८ समाख्यातो -ङ
१९ ब्रह्महा स निगद्यते -ङ
२० भूब्रह्मा –च, ज
२१ षडङ्गन्यासमन्त्रं –ङ, च, ज
२२ तु न्यसेत् –च, ज
२३ नेत्रद्वयोः –च, ज
२४ ॐ –ग, कुर्यात् –च, ज
२५ श्वैतैर्विलेपनैर्युक्ता -ङ
२६ ब्रह्मलोकगतान्तरा –च, ज
२७ तथा –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

गायत्र्यस्येकपदी[२८] द्विपदी त्रिपदी चतुष्पद्यः[२९] ॥ २० ॥
नमस्ते तुरीयाय दर्शनाय पदाय[३०] परोरजसे ।
एवं ध्यात्वा यजेद्[३१] देवीं गायत्रीं परमाक्षरीम्[३२] ॥ २१ ॥
पुनर्ध्यात्वा यन्त्रपीठे पुष्पं दद्याद् वरानने ।
आदौ त्रिकोणं विन्यस्य षट्कोणं तद्बहिर्न्यसेत् ॥ २२ ॥
वृत्तं चाष्टदलं पद्मं तद्बहिश्चतुरस्रकम् ।
चतुर्द्वारसमायुक्तं सावित्रीयन्त्रमीरितम्[३३] ॥ २३ ॥
जीवन्यासादिकं कृत्वा पूजयेत्तां त्रिवर्गदाम् ।
हालाहलादिकं मन्त्रं समस्तं परमेश्वरि ॥ २४ ॥
समुच्चार्य वदेत् पाद्यं सावित्रीं ङेयुता[३४] ततः ।
त्यागात्मकमनुः[३५] पश्चाद् यथाविभवविस्तरैः ॥ २५ ॥
पूजयेद् बहुयत्नेन चान्यथा ब्राह्मणाच्च्युतः[३६] ।
द्रव्याभावे वरारोहे पाद्याद्यैरुदकात्मकैः ॥ २६ ॥
पूजयित्वा जपेद्[३७] देवीं गायत्रीं परमाक्षरीम् ।
दशभिर्जन्मजनितं शतेन च पुरा कृतम् ॥ २७ ॥
त्रियुतं तु[३८] सहस्रेण गायत्री हन्ति पातकम् ।
महेशवदनोत्पन्ना विष्णोर्हृदयसंस्थिता ॥ २८ ॥
ब्रह्मणा समनुज्ञाता गच्छ देवि यथेच्छया ।
इति मन्त्रं समुच्चार्य देव्या वामकरे बुधः ॥ २९ ॥
समर्पयेज्जपफलं[३९] ततः स्तोत्रादिकं पठेत् ।
विधिवल्लक्षजापेन पुरश्चरणमीरितम् ॥ ३० ॥
तद्दशांशं हुनेत् पश्चात् पुरश्चरणसिद्धये ।
होमस्य तु दशांशैकं[४०] तर्पणं तदनन्तरम् ॥ ३१ ॥

---

२८ चैकपदी –च, ज
२९ चतुष्पदी -ङ । चतुष्पद्यपि –च, ज
३० प्रदाय –क, घ
३१ एवं यजेत तां –च, ज
३२ परमेश्वरिम् -ङ
३३ °मुत्तमं -ङ
३४ ङेयुतां –च, ज
३५ त्यागात्मकं पदं –च, ज
३६ ब्रह्मणः स्मृतः –क, ख, ग, घ ।
३७ यजेद् –क, ख, ग, घ, ङ
३८ त्रियुगन्तु –च, ज
३९ समर्पयेदपि फलं –च, ज
४० होमयेत्तद्दशांशैकं –ङ । तद्दशांशेन -च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तर्पणस्य दशांशैकमभिषेकं ततः परम् ।[४१]
अभिषेकदशांशैकं कुर्याद् ब्राह्मणभोजनम् ।। ३२ ।।
ततः सिद्धा भवेद् देवी त्रिवर्गफलसाधिनी ।
माहात्म्यं चास्य मन्त्रस्य चतुर्वेदेन भाषितम् ।। ३३ ।।
आपोमार्जनमन्त्रस्य[४२] प्रकारं शृणु यत्नतः[४३] ।
भूमौ शिरसि चाकाशे आकाशे भुवि मस्तके ।। ३४ ।।
मूर्ध्नि भूमौ तथाकाशे यजुर्वेदे सुरेश्वरि[४४] ।
सामाथर्वे त्विद[४५] देवि ऋग्वेदे शृणु शैलजे ।। ३५ ।।
शून्ये शिरसि चावन्यां[४६] भूमौ शून्ये शिरे तथा ।
भूमौ शून्ये तथा मूर्ध्नि चापोमार्जनमाचरेत् ।। ३६ ।।
आपोहिष्ठेति ये मन्त्राः[४७] अष्ट्यक्षरपदेन तु ।
मार्जनं यत्क्रमेणैव[४८] सर्वपापविनाशनम्[४९] ।। ३७ ।।
व्यतिक्रमेण[५०] चार्वङ्गि ब्रह्महत्या पदे पदे ।
अत एवं क्रमं सर्वं तव स्नेहात् प्रकाशितम् ।।
स्तुतिं च कवचं देवि पठित्वा प्रणमेत् सुधीः ।। ३८ ।।

श्रीदेव्युवाच[५१]

तुरीयं धाम[५२] यो देवः परमात्मा स एव हि ।
शिरःपद्मे[५३] स्थिते बाह्ये नमस्कारः कथं भवेत् ।। ३९ ।।

श्रीशिव उवाच

शिरः[५४] पद्मे महादेवस्तथैव परमो गुरुः ।
तत्समो नास्ति देवेशि पूज्यो हि भुवनत्रये ।। ४० ।।
तद्रूपं[५५] चिन्तयेन्मन्त्री बाह्ये गुरुचतुष्टयम् ।

४१ यो पाठ मातृका 'ङ'मा छैन ।
४२ अपिमार्जन॰॰॰ –क, ख, ग, घ । अपामार्जन -ङ
४३ पार्वति -ङ
४४ आकाशे भुवि मस्तके –ख
४५ सामार्थवेदिनं –क, ख, ग, घ
४६ चारण्यां -ङ
४७ मन्त्रेण –च, ज
४८ तत्क्रमेणैव –च, ज
४९ सर्वपापप्रणाशनम् –च, ज
५० व्यक्तिक्रमेण –च, ज
५१ श्रीपार्वत्युवाच -ङ । श्रीदेवी उवाच –च, ज
५२ तुरीयधामे –च, ज
५३ शिवः पद्मे -घ
५४ शिवः –क, ख, ग
५५ यद्रूपं -ङ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तदंशा भावसम्भूता ये चान्ये गुरवो जनाः ।। ४१ ।।
तथैव[५६] ब्राह्मणाः सर्वे चांशावतारसंस्थिताः ।
यदैव[५७] बाह्ये चैतांश्च प्रत्यक्षो भावयेत्तदा ।। ४२ ।।
सहस्रारे महापद्मे तदा चिन्तां विवर्जयेत् ।
प्रत्यक्षो दर्शने[५८] देवि बाह्ये तद्ब्रह्म चिन्तयन्[५९] ।। ४३ ।।
नमस्कारादिकं देवि कुर्यात् साधकसत्तमः ।
एभ्यो दर्शनमात्रेण नमस्कारादिकं चरेत् ।। ४४ ।।
न कुर्याद् यदि मोहेन स भवेदापदाश्रयः ।
ब्राह्मणादीन् समालोक्य ब्रह्मचारी यतित्रयम् ।। ४५ ।।
दृष्टिमात्रेण गिरिजे प्रणमेद् दण्डवद् भुवि ।
महापातकयुक्तोऽपि मुक्तो भवति तत्क्षणात्[६०] ।। ४६ ।।
न कुर्याद् यदि मोहेन महापातकवान् भवेत् ।
रक्तवस्त्रं समालोक्य तथा भस्माङ्गभूषणम्[६१] ।। ४७ ।।
दण्डहस्तं त्रिशूलं च दृष्ट्वा प्रदक्षिणत्रयम् ।
प्रकुर्यात् साधकश्रेष्ठश्चान्यथा पातकी भवेत् ।। ४८ ।।

इति निर्वाणतन्त्रे तृतीयः पटलः ।। ३ ।।[६२]

---

५६ तदैव –च, ज
५७ तथैव -ङ
५८ प्रत्यक्षादर्शने -ङ
५९ चिन्तनम् -ङ, चिन्तयेत् –च
६० नान्यथा –च, ज
६१ °°°भूषितम् –च, ज
६२ इति श्रीनिर्वाणतन्त्रे तृतीयः पटलः –ख, ग, घ । इति निर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे श्री शङ्करचण्डिकासंवादे तृतीयः पटलः ।। –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तेस्रो पटल

[नेपाली भाषानुवाद]

श्रीशिवले भन्नुभयो ।

हे देवी! जसरी पानीबाट जुन फोका [उत्पन्न हुन्छ त्यो] पानीमा [नै] बिलाउँछ [त्यसरी नै] प्रकृतिबाट जगत्‌को सृजना हुन्छ [अनि त्यो जगत् प्रकृतिमै लय हुन्छ] ।। १ ।।

प्रकृतिबाट [नै] सबैथोक जन्मिन्छ फेरि प्रकृतिमै विलीन हुन्छ । त्यसकारण प्रकृतिको योगले [सबैथोक] उत्पन्न हुन्छ, नत्र भने केही पनि [हुँदैन] ।। २ ।।

हे देवी! निश्चय नै ब्रह्मा, विष्णु र शिव प्रकृतिबाट नै उत्पन्न हुन्छन् । त्यसैगरी प्रलयकालमा त प्रकृतिद्वारा फेरि [तिनलाई आफैँमा] विलीन गरिन्छ ।। ३ ।।

सबै द्विज (ब्राह्मण, क्षत्रिय र वैश्य)हरू शाक्त नै हुन्, शैव वा वैष्णव होइनन् किनभने उनीहरू परम अक्षरस्वरूप गायत्रीदेवीको उपासना गर्दछन् ।। ४ ।।

हे सुन्दरी! वेदमाता भनेर विख्यात, त्रिवर्गफल (सांसारिक जीवनका धर्म, अर्थ र कामस्वरूप फल) दिने भएकी चारै वेदले पूजित गायत्री सुन ।। ५ ।।

हालाहल (ॐ) उद्धृत गरेर वामकर्ण (ऊ) ले युक्त भएको नाभि (भ) अक्षरलाई उद्धार गर्नू अनि फेरि नाभि (भ) अक्षरलाई उद्धार गर्नू । त्यसपछि देवताहरूले वन्दना गरिएकी हे देवी! फेरि कर्ण (उ) ले युक्त नाभि (भ) अक्षर [उद्धार गर्नू] । त्यसपछि नाद (:)ले युक्त वारुण (व) अनि खग (:)ले युक्त चन्द्रबीज (स्व) पनि [भएको] एउटा व्याहृतिको उद्धार गर्नू । त्यसपछि तत् पदलाई उद्धार गरेर सवितुः वरेण्यं भन्ने (पद) पनि उच्चारण गरेर भर्गो देवस्य धीमहि [उच्चारण गर्नू] । त्यसपछि धियो यो नः प्रचोदयात् [अनि] प्रणव [उच्चारण गर्नू] । त्यसपछि [यसरी मन्त्रोद्धार गरिएको] गायत्री र प्रणव (ॐ) जप गर्नू । यसरी जप गर्नाले (साधक) साक्षात् नारायण बन्छ ।। ६–१० ।।

धि र नको मध्यभागमा दुइवटा यकार [छन्] । हे महादेवी! त्यहाँ त्यहाँ विभिन्न श्रुतिपरम्परा नै [छ] । हे महेश्वरी यसलाई [गायत्रीलाई] जप्नाले साधक तत्काल मुक्त हुन्छ । अन्त्यको दुइवटा योकारको स्थानमा जसले यकार पढ्दछ त्यो चण्डाल भनेर चिनिन्छ, उसलाई दिनहुँ ब्रह्महत्या [लाग्दछ] । त्यसैले हे महादेवी! तिम्रो स्नेहका कारणले [यो कुरा] प्रकाशित गरियो । [यो] सबैभन्दा श्रेष्ठ सावित्री विद्या तीनै लोकमा दुर्लभ विद्या [हो] । यो मन्त्र ग्रहण गर्नाले मात्रै [पनि मन्त्र ग्रहण गर्ने व्यक्ति] मर्त्यलोकमा पूज्य हुन्छ, यसमा कुनै संशय छैन ।। ११–१४ ।।

मीठो बोल्ने हे देवी! [यो सावित्री विद्याको] अङ्गन्यासको जुन मन्त्र हो त्यो सुन । बुद्धिमान् व्यक्तिले दुइवटा प्रणवलाई हृदयकमलमा, भूःलाई शिरमा, भुवःलाई शिखामा, स्वःलाई कवचमा, भूर्भुवःस्वःलाई तीनवटा नेत्रमा र स्वःलाई दुई हातको हत्केलामा न्यास गरोस् । नमः, स्वाहा, वषट्, हुँ, वौषट् र फट्‌लाई

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

क्रमशः [हृदय, शिर, शिखा, कवच, तीन आँखा र दुई हातको हत्केलामा] न्यास गरोस् । सुन्दर नितम्ब भएकी हे देवी! [अब ती सावित्रीको] ध्यान सुन । मनुष्यले [माथि] बताएअनुसार ध्यान गरेर पूजा गरोस् ।। १५–१७ ।।

सेतो वर्ण भएकी, रेशमी कपडा भएकी, सेतो चन्दन, सेता फूल तथा सेतै गहनाहरूले सिँगारिएकी, सूर्यमण्डलको बिचमा रहेकी अथवा ब्रह्मलोकमा रहेकी, अक्षमाला धारण गरेकी तथा कमलको आसनमा बसेकी [यस्ती सावित्रीको चिन्तन गरी] "ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि । प्रियं देवानां गायत्री एकपदी द्विपदी त्रिपदी चतुष्पद्यः । नमस्ते तुरीयाय दर्शनाय पदाय परोरजसे" [यस मन्त्रको उच्चारणपूर्वक] ध्यान गरेर गायत्रीको पूजा गर्नू ।। १८–२१ ।।

सुन्दर मुख भएकी हे देवी! फेरि सावित्रीको ध्यान गरेर [तिनै देवीको] यन्त्रपीठमा फूल चढाउनू । पहिले त्रिकोण बनाएर त्यसको बाहिर षट्कोण बनाउनू, त्यसको बाहिर वृत्त र अष्टदल कमल, त्यसको बाहिर चारवटा ढोकाले युक्त चतुष्कोणलाई सावित्रीको यन्त्र बताइएको छ ।। २२–२३ ।।

जीवन्यास आदि गरेर ती त्रिवर्गफल प्रदान गर्ने सावित्रीलाई पूजा गर्नू । हे परमेश्वरी! सम्पूर्ण हालाहल (ॐकार) आदि मन्त्र उच्चारण गरेर चतुर्थीले युक्त सावित्री (पाद्यं समर्पयामि सावित्र्यै नमः आदि)भनेर पाद्य चढाओस् । समर्पणात्मक मन्त्रपछि आफ्नो सामर्थ्यअनुसार बडो यत्नपूर्वक पूजा गर्नू, अन्यथा ब्राह्मणको धर्मबाट च्युत [हुन्छ] । हे सुन्दर नितम्ब भएकी देवी! पूजाद्रव्यको अभावमा जलस्वरूप पाद्य आदिले पूजा गरेर परमाक्षरी गायत्रीको जप गर्नू । तीन लाख जप गर्नाले पहिले गरिएको दश जन्मको पातकलाई गायत्रीले नष्ट गर्दछिन् । "महेशवदनोत्पन्ना विष्णोर्हृदयसंस्थिता ब्रह्मणा समनुज्ञाता गच्छ देवि यथेच्छया" यो मन्त्र उच्चारण गरेर बुद्धिमान् साधकले देवीको बायाँ हातमा जपफल समर्पण गरोस्, त्यसपछि स्तोत्र आदि पाठ गरोस् । विधिवत् एक लाख जपले पुरश्चरण [हुन्छ] भनिएको छ ।। २४–३० ।।

पुरश्चरणसिद्धिका लागि जपको दशांश हवन गरोस्, त्यसपछि होमको दशांश तर्पण, तर्पणको दशांश अभिषेक, त्यसपछि अभिषेकको दशांश ब्राह्मणभोजन गराओस् । त्यसपछि त्रिवर्गफल प्रदान गर्ने देवी सिद्ध हुन्छिन् । यो मन्त्रको माहात्म्य चारै वेदले बताएका छन् ।। ३१–३३ ।।

आपोमार्जन मन्त्रको प्रकार यत्नपूर्वक सुन । हे सुरेश्वरी! यजुर्वेदमा (यजुर्वेदीय परम्परामा) भूमिमा, शिरमा, आकाशमा, आकाशमा, भूमिमा, शिरमा, शिरमा, भूमिमा र आकाशमा [आपोमार्जन गर्नू] । सामवेद, अथर्ववेद र ऋग्वेदमा (तत्तद् वेदलाई अवलम्बन गर्ने परम्परामा) चाहिँ हे पार्वती! आपोमार्जन प्रकार सुन– आकाशमा, शिरमा, भूमिमा, भूमिमा, आकाशमा, शिरमा, भूमिमा, आकाशमा र शिरमा आपोमार्जन गर्नू ।। ३४–३६ ।।

विवरण :

यस ग्रन्थमा उल्लेख भएअनुसार यजुर्वेदीय परम्परामा आपोमार्जनको विधि यसप्रकार रहेको छ–

ॐ आपो हि ष्ठा मयोभुवः– यस अष्टाक्षरी मन्त्रले भूमिमा जल छर्कने,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

ॐ ता न ऊर्जे दधातन– यस मन्त्रले शिरमा जल छर्कने,

ॐ महे रणाय चक्षसे – यस मन्त्रले आकाशमा जल छर्कने,

ॐ यो वः शिवतमो रसः– यस मन्त्रले आकाशमा जल छर्कने,

ॐ तस्य भाजयतेह नः– यस मन्त्रले भूमिमा जल छर्कने,

ॐ उशतीरिव मातरः– यस मन्त्रले शिरमा जल छर्कने,

ॐ तस्मा अरं गमाम वः– यस मन्त्रले शिरमा जल छर्कने,

ॐ यस्य क्षयाय जिन्वथ– यस मन्त्रले भूमिमा जल छर्कने र

ॐ आपो जनयथा च नः– यस मन्त्रले आकाशमा जल छर्कने ।

आठवटा अक्षरको एक पदले [युक्त] जुन "आपोहिष्ठा॰॰" भन्ने मन्त्रहरू छन् [ती मन्त्रहरूले] जुन [उपर्युक्त] क्रमले नै मार्जन [गरिन्छ त्यसले] सम्पूर्ण पापको नाश [गर्दछ] । हे सुन्दर अङ्ग भएकी देवी! व्यतिक्रमले [मार्जन भयो भने] पाइलैपिच्छे ब्रह्महत्या [लाग्दछ] त्यसैले तिम्रो स्नेहले यही नै सबै क्रम प्रकाशित गरियो । हे देवी! स्तुति र कवच पनि पढेर बुद्धिमान् व्यक्तिले [देवीलाई] ढोग गरोस् ।। ३७–३८ ।।

श्रीदेवीले भन्नुभन्नुभयो ।

जुन तुरीय [चतुर्थ] धाम हो निश्चय नै त्यो नै परमात्मा देव हो । त्यो (परमात्मा देव) सहस्रारचक्रमा बसे छँदामा बाहिर कसरी नमस्कार हुन्छ ? ३९ ।।

श्रीशिवले भन्नुभयो ।

सहस्रारचक्रमा महादेव तथा परम गुरु [रहन्छन्] । हे देवी! निश्चय नै तीनै लोकमा तीजस्ता पूज्य [अरू कोही] छैनन् ।। ४० ।।

मन्त्रसाधकले [सहस्रारचक्रको] बाहिर गुरुचतुष्टयलाई त्यही (महादेव)रूपमै चिन्तन गरोस् । अरू जो गुरुजनहरू छन् [ती] तिनैको अंशका रूपमा उत्पन्न भएका हुन् ।। ४१ ।।

त्यसरी नै सबै ब्राह्मणहरू पनि तिनै [महादेवको] अंशावताररूपमा रहेका छन् । बाहिर साक्षात्कार हुँदा यिनीहरूलाई [त्यही रूपमा] भावना गर्नू ।। ४२ ।।

हे देवी! सहस्रार महाचक्रमा [भावना गर्नाले] त्यतिखेर चिन्तारहित हुन्छ भने बाहिर प्रत्यक्ष देखिँदा ब्रह्म चिन्तन गर्दै साधकले नमस्कार आदि गरोस् । देख्दामात्रै [पनि] यिनीहरूलाई नमस्कार आदि गरोस् । यदि मोहवश गरेन भने त्यो आपत्मा पर्दछ । ब्रह्मचारी, यतित्रय [सन्न्यासी, वानप्रस्थ र भिक्षुक], ब्राह्मण आदिलाई देखेमात्रै [पनि] हे पार्वती! भुइँमा दण्डवत् प्रमाण गरोस् । [यसो गर्नाले] महापातकी पनि तत्काल मुक्त हुन्छ ।। ४३–४६ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

यदि मोहवश नमस्कार गरेन भने महापातकी हुन्छ। साधकले रक्तवस्त्रधारी शाक्त, भस्मधारी शैव, दण्डधारी सन्न्यासी र त्रिशूल देखेपछि तीनपटक प्रदक्षिणा गरोस्। अन्यथा [ऊ] पातकी हुन्छ ।। ४७–४८ ।।

श्रीचण्डिका र शङ्करको संवादस्वरूप निर्वाणतन्त्रमा तेस्रो पटल पूरा भयो ।। ३ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चतुर्थः पटलः

श्रीदेव्युवाच[१]

संन्यासी कीदृशो नाथ अवधूतस्तु कीदृशः ।
कीदृशो वा ब्रह्मचारी गृहस्थो वापि कीदृशः ।।१ ।।

श्रीशिव उवाच

दिव्यप्रकाशमूर्तिं च[२] चिन्तयेद् दण्डधारिणम्[३] ।
वीरस्य मूर्तिं देवेशि सदा भस्मादिभूषणम्[४] ।। २ ।।
कौलिकस्य गृहस्थस्य मूर्तिं तद्ब्रह्मचारिणम्[५] ।[६]
गृहस्थस्य दिव्यमूर्तिं चन्दनादिविभूषितम्[७] ।।
सर्वेषां पितृरूपोऽसौ गृहस्थः साधुरूपकः ।। ३ ।।

श्रीशिव उवाच[८]

श्रृणु देवि प्रवक्ष्यामि बृहद्ब्रह्माण्डलक्षणम् ।। ४ ।।
मेरुपर्वतमध्ये तु[९] सर्वदेवाश्रयः प्रिये ।
महाधीरा[१०] नदी तत्र मध्यदेशे सदा स्थिता ।। ५ ।।
सुमेरोश्चोर्ध्वदेशे तु सत्यलोकं वरानने ।
अधोभागे महेशानि प्रतिष्ठति रसातलम् ।। ६ ।।
एवंक्रमे मेरुमध्ये भुवनानि चतुर्दश ।
पातालसप्तकस्योर्ध्वे[११] ब्रह्मपद्मं सुरेश्वरि[१२] ।। ७ ।।
अधोवक्त्रं हि तत्पद्मं धरामध्ये चतुर्दलम् ।
पद्ममध्ये बीजकोषे क्षितिचक्रं मनोहरम् ।। ८ ।।
वलयाकाररूपेण समुद्राः सप्त संस्थिताः ।
जम्बूद्वीपं मध्यदेशे चतुष्कोणं मनोहरम् ।। ९ ।।

---

१ देव्युवाच -ङ । चण्डिकोवाच -च । श्रीचण्डिका उवाच –ज
२ दिव्यप्रकाशिकां मूर्तिं -च
३ दण्डधारिणम् -च । दण्डधारिणीम् – ज
४ भस्मांगभूषणाम् –ङ, च, ज
५ ब्रह्मचारिणः –च, ज
६ वीरस्य मूर्तिं देखि तद्ब्रह्मचारिणम् सम्मको पाठ मातृका क, ख, घमा छैन ।
७ °°°°विभूषिताम् –च, ज
८ यो पाठ मातृका 'ङ'मा छैन ।
९ मेरुपर्वततन्मध्ये –ङ, च, ज
१० महावीरा -ङ
११ पातालसप्तकं चोर्ध्वे –च, ज
१२ महेश्वरि –ङ, च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

त्रिकोणं मदनागारं कन्दर्पश्चाधिदेवता ।
ऐन्द्ररूपं हि लंबीजं[13] गजेन्द्रवाहनं शिवे ।। १० ।।
त्रिकोणे मदनागारे बिन्दुरूपो[14] महेश्वरः ।
मायाशक्तिर्महेशानि भुजगाकाररूपिणी ।। ११ ।।
तयैव वेष्टितं लिङ्गं सार्धत्रिवलयाकृतिः ।
लिङ्गच्छिद्रं[15] स्ववक्त्रेण[16] समाच्छाद्य स्थिता सदा ।। १२ ।।
ऐन्द्रबीजं वरारोहे लिङ्गस्य वामदेशके ।
सुसिद्धं ब्रह्मसदनं नादोपरि सुसुन्दरम् ।। १३ ।।
तत्रैव निवसेद् ब्रह्मा सृष्टिकर्ता प्रजापतिः ।
वामभागे च सावित्री वेदमाता सुरेश्वरी ।। १४ ।।
तस्याः प्रसादमासाद्य सृष्टिं वितनुते सदा ।
यद्रूपं[17] ब्रह्मसदनं लक्षयोजनविस्तृतम् ।। १५ ।।
तत्सर्वं परमेशानि ऋग्वेदाख्ये[18] मयोदितम् ।
त्रिकोणं[19] परमेशानि द्विषष्टितमकोष्ठकाः ।। १६ ।।
तदेव पर्वतं[20] प्रोक्तं सर्वदेवाश्रयं[21] हि तत् ।
त्रिकोणमध्ये तद्बाह्ये पश्चात्[22] पूर्वं वरानने ।। १७ ।।
स्थावरं पर्वतं पश्य कीटं पशुमनुत्तमम् ।
खगं नरादिकं देवि नास्ति किं पृथिवीतले ।। १८ ।।
त्रिकोणबाह्ये गिरिजे पर्वतं बहुरूपकम् ।
नीलाचलं मन्दरं च पर्वतं चन्द्रशेखरम् ।। १९ ।।
हिमालयं सुमेरुं[23] च मलयं भस्मपर्वतम् ।
चतुष्कोणे वसेद् देवि एतत्[24] सप्तकुलाचलम्[25] ।। २० ।।
एतेषां शिखराज्जातं पर्वतं बहुरूपकम् ।

---

१३ ऐन्द्ररूपं हि लंबीजं –क, ख, ग, घ, छ
१४ लिङ्गरूपो -ङ। लिङ्गरूपी –च, ज
१५ लिङ्गं छिद्रं –क, ख, ग
१६ तद्वक्त्रेण –च, ज
१७ यद्रूपं –क, ख, ग, घ, छ
१८ ऋग्वेदाख्यं –च, ज
१९ त्रिकोणे –ङ, च, ज
२० परतः -ङ
२१ सर्वदेवाग्रजं –च, ज
२२ पश्य -ङ
२३ सुवेशं -ङ, सुवेलं –च, ज
२४ तथैव -ङ
२५ दानवाचलम् -ङ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
नानादेवालय[२६] देवि तथैव दानवालयम् ।। २१ ।।
तृणगुल्मलतावल्ली[२७] नानारूपाणि तत्र वै ।
पापिष्ठाः तत्र वै जाताः कर्मयोगेन[२८] पार्वति ।।[२९]
जायन्ते च म्रियन्ते च पूर्वोक्तेनैव वर्त्मना ।। २२ ।।

इति निर्वाणतन्त्रे योगविवरणं नाम चतुर्थः पटलः ।।[३०]

२६ नानादेवालयो –च, ज
२७ तृणगुल्मलतालक्षं –च, ज
२८ क्रमयोगेन –ख, ग, घ
२९ यो पाठ मातृका 'ङ'मा छैन ।
३० इति निर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे हरगौरीसंवादे योगविवरणं नाम चतुर्थः पटलः ।। –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चौथो पटल

[नेपाली भाषानुवाद]

श्रीदेवीले भन्नुभयो ।

हे प्रभु! सन्न्यासी [भनेको] कस्तो हो? अवधूत [भनेको] कस्तो हो? ब्रह्मचारी [भनेको] कस्तो हो ? र गृहस्थ [भनेको] कस्तो हो ? १ ।।

श्रीशिवले भन्नुभयो ।

हे देवी! दण्डधारी सन्न्यासीलाई दिव्यप्रकाशस्वरूप सम्झनू । वीर [साधक]को स्वरूपलाई सधैँ भस्मादिले विभूषित [सम्झनू] । कौलिक गृहस्थको स्वरूपलाई ब्रह्मचारीको स्वरूप [सम्झनू] । गृहस्थको स्वरूपलाई चन्दन आदिले विभूषित दिव्यस्वरूप सम्झनू । साधुस्वरूप गृहस्थ सबैको पितास्वरूप हो ।। २–३ ।।

श्रीशिवले भन्नुभयो ।

हे देवी! बृहत् ब्रह्माण्डको लक्षण बताउँछु, सुन ।। ४ ।।

हे प्यारी! मेरुपर्वतको बिचमा सबै देवताहरूको आश्रय [रहेको छ] । त्यहाँ (मेरुपर्वतको) बिच भागमा सधैँ महाधीरा नदी रहेको छ ।

हे सुन्दर मुख भएकी देवी! हे महेश्वरी! सुमेरुको माथिल्लो भागमा चाहिँ सत्यलोक [रहेको छ भने] तल्लो भागमा रसातल रहेको छ ।। ६ ।।

यही क्रमले मेरुको माझमा चौध भुवनहरू [रहेका छन्] । हे सुरेश्वरी! सप्तपातालको माथि ब्रह्मपद्म [रहेको छ] ।। ७ ।।

तलतिर मुख फर्केको, चारवटा पात भएको त्यो पद्म पृथिवी [मण्डल]को बिचमा [रहेको छ] । कमलको बिचमा बीजकोषमा मनोहर क्षितिचक्र रहेको छ । [त्यहाँ] सातवटा समुद्रहरू घुमेर रहेका छन् । माझमा चतुष्कोण भएको मनोहर जम्बुद्वीप [रहेको छ] ।। ८–९ ।।

[सोही क्षितिचक्रको बिचमा] कामदेवको घर त्रिकोण [छ] । [त्यसका] अधिदेवता कन्दर्प [हुन्] । हे पार्वती! हात्तीलाई वाहन बनाएको लँरूप ऐन्द्रबीज [त्यहाँ रहेको छ] । ११ ।।

हे महेश्वरी! कामदेवको घरस्वरूप [उक्त] त्रिकोणमा लिङ्गरूप महेश्वर [तथा] सर्पाकार मायाशक्ति [रहेका छन्] । तिनै (साँढे तीन फन्का लगाएको सर्पाकार मायाशक्ति)ले लिङ्ग बेरिएको छ । आफ्नो मुखले लिङ्गको प्काललाई सधैँ ढाकेर [ती मायाशक्ति] रहेकी छिन् ।। १२ ।।

हे सुन्दर नितम्ब भएकी देवी! लिङ्गको बायाँ भागमा ऐन्द्रबीज [रहेको छ] । उक्त [ऐन्द्रबीजको] नादको माथि अति सुन्दर, अति सिद्ध ब्रह्मसदन रहेको छ । त्यहीँ नै सृष्टिकर्ता प्रजापति ब्रह्मा बस्दछन् । उनको

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
बायाँ भागमा वेदमाता सुरेश्वरी सावित्री [बस्दछिन्] ।। १३–१४ ।।

तिनै सावित्रीको कृपा पाएर [प्रजापति ब्रह्मा] सधैँ सृष्टिको विस्तार गर्दछन् । [उनको] अति सुन्दर ब्रह्मसदन एक लाख योजन फैलिएको छ ।। १५ ।। हे परमेश्वरी! त्यो सबै मैले ऋग्वेदमा बताएको छु। हे परमेश्वरी! [कामदेवको घरको रूपमा रहेको] त्रिकोण बैसट्ठी कोठाले युक्त छ ।। १६ ।।

त्यही नै सबै देवताहरूको आश्रयभूत [मेरु] पर्वत [हो] भनेर भनिएको छ । हे सुन्दर मुख भएकी देवी! पहिले त्रिकोणको बिचमा तथा पछि त्यसको बाहिर स्थावर, पर्वत, कीट, पशु, चरा, मानिस आदि हेर । हे देवी! पृथिवीमा के छैन ? १७–१८ ।।

हे गिरिजा! त्रिकोणको बाहिर चतुष्कोणमा अनेक रूपका नीलाचल, मन्दर, चन्द्रशेखर, हिमालय, सुमेरु, मलय र भस्मपर्वत यो सप्तकुलाचल रहेको छ ।। १९–२० ।।

विवरण :

यहाँ सातवटा कुलपर्वतको उल्लेख छ र बाह्य ब्रह्माण्डमा स्थित ती पर्वतहरूको चिन्तन मूलाधारचक्रमा रहेको चतुष्कोणमा गर्नुपर्ने निर्देश यहाँ पाइन्छ। सिद्धसिद्धान्तपद्धति नामक ग्रन्थमा भने सातवटा कुलपर्वतको सट्टा आठवटा कुलपर्वतहरूको उल्लेख पाइन्छ । जसअनुसार अष्टकुलपर्वत मेरु, कैलास, हिमालय, मलय, मन्दर, विन्ध्य, मैनाक र श्रीशैल हुन् । बाह्य ब्रह्माण्डमा स्थित यी अष्टकुलपर्वतहरूको चिन्तन शरीरका विभिन्न अङ्गमा गर्ने निर्देश यहाँ दिइएको छ । जसअनुसार मेरुदण्डमा मेरु, शिरमा कैलास, पृष्ठभागमा हिमलय, बायाँ काँधमा मलय, दायाँ काँधमा मन्दर, दायाँ कानमा विन्ध्य, बायाँ कानमा मैनाक र निधारमा श्रीशैल पर्वतहरूको चिन्तन गर्नुपर्दछ (सिद्धसिद्धान्तपद्धति, ३।१०) ।

यिनै सप्तकुलाचलको शिखरबाट अनेक रूपका पर्वत, नाना प्रकारका देवालय तथा दानवालय बनेका छन् । त्यहीँ नै नाना रूपका घाँसपात, लहरा [रहेका छन्] । हे पार्वती! त्यहीँ नै पहिले नै बताइएको कर्मयोगको मार्गले पापिष्ठहरू जन्मिए, [फेरि पनि] जन्मन्छन् र मर्छन् ।। २१–२२ ।।

श्रीचण्डिका र शङ्करको संवादस्वरूप निर्वाणतन्त्रमा योगविवरण नामक चौथो पटल पूरा भयो ।। ४ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पञ्चमः पटलः

श्रीशिव उवाच
एतत्पद्मस्योर्ध्वदेशे भीमाख्यं पङ्कजं शुभम् ।
पत्रषट्कं तथा वृत्तं चतुर्द्वारविभूषितम् ।। १ ।।
पद्ममध्ये बीजकोषे[१] भुवर्लोकं मनोहरम् ।
सिन्दूरसदृशं रक्तवर्णेन शोभितं सदा ।। २ ।।
सिन्दूरारक्तवस्त्रेण[२] निर्मितं चक्रपाणिना ।
तस्योर्ध्व[३] निवसेद् विष्णुः श्रीर्वाणी वामदक्षिणे ।। ३ ।।
ब्रह्मणा सृज्यते लोकः पाल्यते चक्रपाणिना ।
वैकुण्ठं नाम तत् स्वर्ग[४] नानादेवालयं हि तत् ।। ४ ।।
वैकुण्ठस्य दक्षभागे गोलोकं सर्वमोहनम् ।
तत्रैव राधिका देवी द्विभुजो मुरलीधरः[५] ।। ५ ।।
नारदाद्यैर्मुनिगणैः सेवित[६] वेदपारगैः ।
वैकुण्ठसदृशं स्थानं नास्ति ज्ञाने च मामके[७] ।। ६ ।।
अत्र मध्ये तथा बाह्ये यथा सर्व प्रपश्यति[८] ।
तथैव भूमिगाः सर्वे परिपश्यन्ति ज्यौतिषम्[९] ।। ७ ।।[१०]
नानाभोगयुताः सर्वे नानारत्नेन भूषिताः ।
इन्द्राद्या देवताः सर्वे तिष्ठन्ति स्तुतिहेतवे[११] ।। ८ ।।[१२]
महासत्त्वमयं लोकं वेदबाहुविराजितम् ।
पीताम्बरं शान्तमूर्तिं वनामालाविभूषितम् ।। ९ ।।
एवं भक्तजनं सर्व[१३] वैकुण्ठे चोपशोभितम् ।

---

१ राजकोष –च, ज
२ सिन्दूराभरक्ताभ्रेण –च, ज
३ तस्योर्ध्वे –क, ख, ग, ङ
४ सर्गे –क
५ द्विभुजा मुरलीधरा–च, ज
६ शोभितं –च, ज
७ साधके -ङ
८ ज्योतिषं परिपश्यति –च, ज
९ ज्योतिषं परिपश्यति –क, ख, ग, घ, ङ
१० यो पाठ मातृका च र जमा छैन ।
११ यथा सर्वं प्रपश्यति
१२ तथैव भूमिगाः सर्वे तिष्ठन्ति स्तुतिहेतवे ।। –च, ज मातृकाको अधिक पाठ ।
१३ सर्वे –ग

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

विष्णुशब्दं[१४] विष्णुगणं[१५] वैष्णवं विष्णुरूपकम् ।। १० ।।
विष्णुगानं विना नास्ति वैकुण्ठे परमेश्वरि
यद्रूपं गोलकं धाम[१६] तद्रूपं नास्ति मामके ।। ११ ।।
ज्ञाने वा चाक्षुषे[१७] किं वा ध्यानयोगे न विद्यते ।
शुद्धसत्त्वमयं देवि[१८] नानादेवेन[१९] शोभितम् ।। १२ ।।
तत्रैव भाति कैलासस्तत्रैव ब्रह्मणः पुरम् ।
वैकुण्ठनगरं तत्र तत्रैव रविरालयम्[२०] ।। १३ ।।
चन्द्रालयं हि तत्रैव कन्दर्पनिलयं प्रिये ।
सर्वदेवालयं[२१] तत्र देवकन्यादिशोभितम् ।। १४ ।।
मध्यदेशे गोलकाख्यं[२२] श्रीविष्णोर्भोगमन्दिरम् ।
श्रीविष्णोस्सत्त्वरूपस्य[२३] यत्स्थूलं[२४] चित्तमोहनम् ।। १५ ।।
तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेऽधुना ।
यत्रैव सततं भाति द्विभुजो मुरलीधरः ।। १६ ।।
निराकारो महाविष्णुः साकारोऽपि क्षणे क्षणे ।
यदा साकाररूपोऽसौ तदैव मुरलीधरः ।। १७ ।।
तदा सत्त्वमयो विष्णुर्भुवनं पाति निश्चितम्[२५] ।
वैष्णवस्य महामोक्षो यत्रैव परमेश्वरि ।। १८ ।।
इति स्थानस्य माहात्म्यं सङ्क्षेपेण मयोदितम् ।
विस्तरेण[२६] न शक्नोमि[२७] जन्मान्तरशतेन च ।। १९ ।।
बीजकोषस्य बाह्ये तु वेष्टितं तोयमण्डलम् ।
प्रमाणं सुन्दरं तोयं यदा क्षीरोदसागरम् ।। २० ।।
धुस्तूरज्योतिषाकारं[२८] कोटिचन्द्रसमद्युतिम् ।

१४ विष्णुगणं –ख, ग
१५ विष्णुज्ञान –च, ज
१६ धाम गोलोकं –च, ज
१७ चक्षुषि –ङ, च, ज
१८ शुद्धसत्त्वमयैर्देवि –क, ख, ग
१९ नानावेदेन –च, ज
२० रविकालयम् –च, ज
२१ सर्वं देवालयं –च, ज
२२ गोलोकाख्यं –च, ज
२३ श्रीविष्णोस्तत्त्वरूपस्य –च, ज
२४ यत्स्थानं –च, ज
२५ निश्चयम् –च, ज
२६ विस्तारेण –ङ
२७ विस्तारेण च शक्नोमि –च, ज
२८ धूम्रस्य –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वलयाकाररूपेण सुशुभ्रं तोयमण्डलम् ।। २१ ।।
गङ्गादिसरितः सर्वास्तत्रैव भान्ति सुन्दरि ।
इन्द्रादिदेवताः सर्वाः[२९] स्तूयमाना निरन्तरम् ।। २२ ।।
गन्धर्वयक्षनागादि कुष्माण्डा भैरवास्तथा ।
वेदगानेन भासन्ते[३०] मूर्तिमन्तः सदैव हि ।। २३ ।।
नानासुखविशेषेण[३१] सदा चैकाग्रचेतसः ।
विष्णुगानं प्रकुर्वन्ति स्तुतिभक्तिपरायणाः ।। २४ ।।
वेदगानं प्रकुर्वन्ति चतुर्वक्त्रेण वेधसा ।
मालवाद्याश्च[३२] षड्रागाः षट्त्रिंशद्रागिणी तथा[३३] ।। २५ ।।[३४]
मालवेनैव रागेण सामगानं सदा प्रिये ।
मल्लारेण सदाऽथर्व वसन्तेन तथा पुनः ।। २६ ।।
हिन्दोलेन[३५] यजुः पाठं सदा कुर्वन्ति[३६] वेधसः ।
कर्णाटेनैव ऋग्वेदं श्रीरागेण तथा शिवे ।। २७ ।।
निर्दिष्टपाठमेतत्तु अनिर्दिष्टमतः परम् ।
तत्रैव रागा वर्तन्ते सहस्राणि च षोडश ।। २८ ।।
तत्रैव भान्ति तालाश्च[३७] सहस्राणि च षोडश ।
मुरारेर्मुरलीगानाज्जायन्ते सर्वतालकाः[३८] ।। २९ ।।
तेन तालेन रागेण सदा गायन्ति वेधसः ।
तद्रागस्य विभागं हि कुर्वन्ति मुनयो जनाः ।। ३० ।।
वसन्ताद्याश्च ऋतवस्तिष्ठन्ति तत्र सन्ततम् ।
नानाऋतुप्रसूनेन[३९] भूषितो मुरलीधरः ।। ३१ ।।
तत्रैव राधिका देवी नानासुखविलासिनी ।
वदन्ती मुरलीगानं कुरु कान्त प्रमोहणम् ।। ३२ ।।
येन शब्देन कामस्य उत्पत्तिर्जायते सदा ।

---

२९ सर्वे –क, ख, ग, घ, ङ
३० भाषन्ते –च, ज
३१ विलासेन –घ, ङ
३२ मालवादि च –ग, ङ
३३ गणाः –घ
३४ नानासुखविशेषेण देखि षट्त्रिंशद्रागिणी तथा सम्मको पाठ मातृका क, ख, च, छ र जमा छैन ।
३५ हिल्लोलेन –ङ, च, ज
३६ कुर्वीत –च, ज
३७ तासां च –च, ज
३८ सर्वे तालाः प्रजायते –क, ख, ग, घ, ङ
३९ नानाधातुप्रसूतेन –घ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri
तद्रागं[४०] चैव तत्तालं कुरु गानं प्रयत्नतः ।। ३३ ।।
एवमानन्दसंयुक्ता महावेशविलासिनी ।
वामभागे सदा भाति राधिका भक्तवत्सला ।।
प्रार्थनैकां प्रकुर्वन्ती[४१] राधिका भक्तिसंयुता ।। ३४ ।।
श्रीराधिकोवाच[४२]
तव भक्तियुता मर्त्याश्चाथवा[४३] भक्तिसंयुताः ।
गोलोकस्थं महाविष्णुं द्विभुजं मुरलीधरम् ।। ३५ ।।
सदानन्दयुतं देवं मम सङ्गे विराजितम् ।
एवं ध्यायन्ति ये मर्त्यास्तस्योपायस्तु कीदृशः ।।[४४]
तद्वदस्व विशेषेण यद्यहं तव वल्लभा ।। ३६ ।।
श्रीभगवानुवाच
ये यथा मां भजन्त्येव तेन मार्गेण सद्गतिम् ।
दास्यामि शृणु चार्वङ्गि सदा त्वं भक्तवत्सला ।। ३७ ।।
आदौ राधां ततः कृष्णं जपन्ति[४५] ये च मानवाः ।
तेषां च सद्गतिं चात्र दास्यामि नात्र संशयः ।। ३८ ।।
गुरुणा भावमार्गेण मन्त्रमार्गेण चैव हि ।
ये जना मां भजन्त्येव ते नरा मत्समाः सदा ।। ३९ ।।
या नारी मामभेदेन भजते पुरुषं सदा ।
त्वत्समा सा सदा नारी जायते नात्र संशयः ।। ४० ।।
भक्त्या वाप्यथवाभक्त्या जपन्ति[४६] युगलं यदि ।
तव भक्त्या प्रदास्यामि सद्गतिं शृणु राधिके ।। ४१ ।।
मद्भक्ता नैव गच्छन्ति कदाचिद्यममन्दिरम् ।
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं हि राधिके ।। ४२ ।।[४७]
इति श्रुत्वा च सा देवी राधिका प्रेमवत्सला[४८] ।
अङ्के[४९] शेते महाविष्णोः कामबाणेन[५०] पीडिता ।।

---

४० तद्रूपं -ङ
४१ प्रकुर्वीत –च, ज
४२ श्रीराधिका उवाच –ज
४३ मर्त्यास्तथैव –च, ज
४४ एवं ध्यायति यो मर्त्यस्तस्योपायं तु कीदृशम् –च, ज
४५ जल्पन्ति -घ
४६ जल्पन्ति -घ, ङ
४७ मातृका 'ङ'मा यो पाठ माथिल्लो हरफमा छ ।
४८ भक्तवत्सला -ङ
४९ चाङ्के –ङ, च, ज
५० कामभावेन –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विष्णुलोकमिदं[५१] देवि चापरं श्रृणु यत्नतः ।। ४३ ।।

इति श्रीनिर्वाणतन्त्रे पञ्चमः पटलः ।।[५२]

५१ °°°°मिमं–ग

५२ इति निर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे चण्डिकाशङ्करसंवादे पञ्चमः पटलः ।। –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पाँचौँ पटल

[नेपाली भाषानुवाद]

श्रीशिवजी भन्नुहुन्छ–

यो मूलाधारपद्मको माथिल्लो भागमा भीम नामक सुन्दर कमल [रहेको छ] । [उक्त कमल] छवटा पात, वृत्त र चारवटा द्वार (भूपुर)ले विभूषित छ ।। १ ।।

[उक्त] पद्मको माझमा बीजकोषमा सुन्दर भुवर्लोक [रहेको छ जुन] सधैँ सिन्दूरजस्तो रातो वर्णले सुशोभित छ । [उक्त भुवर्लोक] सिन्दूरजस्तो रातो वस्त्र धारण गर्ने विष्णुले बनाएका हुन् । त्यो कमलको माथि विष्णु बस्दछन्, बायाँ र दायाँ श्री र वाणी बस्दछिन् ।। २–३ ।।

ब्रह्माले लोकको सिर्जना गर्दछन् [भने] विष्णुले [त्यसको] पालना गर्दछन् । वैकुण्ठ नामक त्यो स्वर्ग निश्चय नै नाना प्रकारका देवताहरूको घर हो । वैकुण्ठको दक्षिण भागमा सबैलाई मोहित पार्ने गोलोक [रहेको छ] । त्यहाँ नै राधिका तथा दुई हात भएका मुरलीधर [कृष्ण रहेका छन्] । नारद आदि गरिएका मुनिगणहरूद्वारा तथा वेदमा पारङ्गत विद्वान्‌हरूले सेवा गरिएको वैकुण्ठजस्तो स्थान मेरो ज्ञानमा [अरू] छैन ।। ४–६ ।।

यहाँ बिचमा तथा बाहिर जसरी सबैले हेर्दछन् त्यसरी नै भूमिमा रहेका सबैले ज्योति वा प्रकाशलाई हेर्दछन् ।। ७ ।।

नाना प्रकारका भोगले युक्त तथा नाना प्रकारका रत्नले सुशोभित इन्द्र आदि गरिएका सबै देवताहरू स्तुतिका लागि बस्दछन् ।। ८ ।।

[सो वैकुण्ठ] वेद (चार) हात भएका, पहेँलो वस्त्र लगाएका, शान्तस्वरूप, वनमालाले विभूषित विष्णु विराजमान भएको महासत्त्वमय लोक हो ।। ९ ।।

त्यसैगरी सबै भक्तजनहरू वैकुण्ठमा सुशोभित छन् । हे परमेश्वरी! विष्णुशब्द, विष्णुगण, विष्णुरूपका वैष्णव, विष्णुगानविना वैकुण्ठमा केही पनि छैन । गोलोक धाम जुन स्वरूपको छ त्यस्तो ज्ञानमा, हेराइमा, ध्यानयोगमा मेरो लोक [कैलास] छैन । शुद्ध सत्त्वमय [वस्तु]हरूले, नाना देवताहरूले वैकुण्ठ सुशोभित छ ।। १०–१२ ।।

त्यहीँ नै कैलास, त्यहीँ नै ब्रह्माको नगर, त्यहीँ नै वैकुण्ठनगर, त्यहीँ नै सूर्यलोक, त्यहीँ नै चन्द्रलोक, त्यहीँ नै कामदेवको लोक, त्यहीँ नै सबै देवकन्याहरूले सुशोभित देवताहरूको लोक रहेको छ ।। १३–१४ ।।

मध्यभागमा गोलोक नामक श्रीविष्णुको भोगमन्दिर [रहेको छ] । सत्त्वरूप विष्णुको जुन चित्ताकर्षक ठूलो [गोलोक नामक] स्थान छ त्यसको माहात्म्य म अहिले कसरी बताउन सक्छु? यहीँ नै दुई हात भएका मुरलीधर कृष्ण सधैँ रहन्छन् ।। १५–१६ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

निराकार भए तापनि महाविष्णु क्षण क्षणमा साकार [रूप ग्रहण गर्दछन्] । जब यिनी साकार रूप [हुन्छन्] तब मुरलीधर [कृष्णको रूप ग्रहण गर्दछन्] ।। १७ ।।

तब सत्त्वमय विष्णुले निश्चित रूपमा भुवनको पालन गर्दछन् । हे परमेश्वरी! यहीँ नै वैष्णवको महामोक्ष [हुन्छ] ।। १८ ।।

यसप्रकार स्थानको माहात्म्य मैले सङ्क्षेपमा बताएँ । विस्तरपूर्वक त सयौँ जन्मले पनि सक्तिनँ ।। १९ ।।

बीजकोषको बाहिरी भागमा त क्षीरसागर प्रमाणको सुन्दर जलमण्डल घेरिएको [छ] ।। २० ।।

[उक्त] तोयमण्डल धतुरो फूलको जस्तो ज्योतिस्वरूपको, करोडौँ चन्द्रमाको जस्तो प्रकाश भएको घुमाउरो आकारले बडो सुन्दर [छ] ।। २१ ।।

हे सुन्दरी! गङ्गा आदि सबै नदीहरू त्यहीँ नै झल्किन्छन् । निरन्तर स्तुति गर्ने इन्द्र आदि सबै देवताहरू, गन्धर्व, यक्ष , नाग आदि, कुष्माण्ड, त्यसैगरी भैरवहरू मूर्तिमान् बन्दै सधैँ नै वेदगानले चम्किन्छन् ।। २२–२३ ।।

हे प्रिये! हे कल्याणी! विद्वान्हरू सधैँ मालव रागले सामगान, मल्लार तथा फेरि वसन्त [राग]ले अथर्व [गान], हिन्दोल [राग]ले यजुर्वेदको पाठ, कर्णाट [राग]तथा श्रीरागले ऋग्वेद [गान] गर्दछन् ।। २४–२५ ।।

यो चाहिँ निर्दिष्ट पाठ [भयो], यसपछि अनिर्दिष्ट [पाठ हुन्छ] । त्यहीँ नै सोह्र हजार रागहरू छन् । त्यहीँ नै सोह्र हजार तालहरू छन् । मुरारिका मुरलीगानबाट सबै तालहरू निस्कन्छन् । त्यहीँ ताल र रागले विद्वान्हरू गाउँछन् । मुनिजनहरूले नै त्यो रागको विभाग गर्दछन् ।। २६–२८ ।।

त्यहाँ सधैँ वसन्त आदि ऋतुहरू रहन्छन् । विभिन्न ऋतुहरूका फूलले मुरलीधर सिँगारिएका छन् ।। २९ ।।

त्यहाँ नै विभिन्न प्रकारका सुखमा रमाउने [तथा आफ्ना प्रेमी कृष्णलाई]हे प्रिय! मनलाई मोहित बनाउने मुरलीगान गर्नुहोस् जुन शब्दले सधैँ कामको उत्पत्ति हुन्छ, त्यस्तो राग र ताल [ले युक्त] गान गर्नुहोस् भन्ने प्रार्थना [कृष्णलाई] गर्ने भएकी, आनन्दले युक्त भएकी, [रतिको] महा आवेशमा रमाउने, भक्तवत्सल राधिका देवी सधैँ [कृष्णको] बायाँ भागमा रहन्छिन् ।। ३०–३२ ।।

श्रीराधिकाजी भन्नुहुन्छ–

हे कृष्ण! यदि म तपाइँको प्रेयसी हुँ भने मेरो साथमा रहनुहुने, सधैँ आनन्दले युक्त, गोलोकमा रहनुभएका, दुई हातले युक्त, मुरलीधर महाविष्णु तपाइँको जसले ध्यान गर्दछन् ती मानिसहरू तथा तिनको उपाय कस्तो [छ] त्यो कुरा विशेष प्रकारले बताउनुहोस् ।। ३३–३४ ।।

श्रीभगवान् भन्नुहुन्छ–

हे सुन्दर अङ्ग भएकी [राधा]! तिमी सधैँ भक्तवत्सल [छ्यौ] । जसले मलाई जसरी [जुन मार्गले] नै भज्दछन् [तिनीहरूलाई] त्यही मार्गले [म]सद्गति दिन्छु । जो मानिसहरूले पहिले राधा त्यसपछि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृष्णको जप गर्दछन् तिनीहरूलाई पनि सद्गति दिन्छु, यसमा कुनै संशय छैन ।। ३५–३६ ।।

गुरुले दिएको निर्देशअनुसार जो मानिसहरू भावमार्गले वा मन्त्रमार्गले मेरो उपासना गर्दछन् ती मानिसहरू सधैँ मजस्तै हुन् । जुन नारीले सधैँ आफ्नो लोग्नेलाई मसँग अभेदरूपले सेवा गर्दछे त्यो नारी सधैँ तिमीजस्तै हुन्छे, यसमा संशय छैन ।। ३७–३८ ।।

हे राधा! सुन– भक्तिले अथवा भक्तिविना पनि यदि [हाम्रो] युगल [स्वरूप]लाई आराधना गर्दछन् भने तिम्रो भक्तिका कारणले [म तिनीहरूलाई] सद्गति दिनेछु । मेरा भक्तहरू कहिल्यै पनि यमलोकमा जाँदैनन् । हे राधिका! [यो कुरा] साँचो [हो], साँचो [हो], फेरि पनि साँचो [हो], साँचो [हो], साँचो [हो] । यो कुरा सुनेर प्रेमवत्सल राधिका कामबाणले पीडित हुँदै महाविष्णुको काखमा सुतिन् । हे देवी! यो विष्णुलोक [को कुरा भयो, अब] अर्को [लोकको कुरा] यत्नपूर्वक सुन ।। ३९–४१ ।।

निर्वाणतन्त्रमा पाँचौँ पटल पूरा भयो ।। ५ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

षष्ठः पटलः

श्रीशङ्कर उवाच
एतत्पद्मस्योर्ध्वदेशे महापद्मं सुदुर्लभम् ।
दशपत्रं नीलवर्णं सजलं घनरूपकम्[१] ॥
डादिफान्तैः सचन्द्रैश्च पङ्कजं चातिशोभितम्[२] ॥ १ ॥
तन्मध्ये बीजकोषे निवसति सततं वह्निबीजं सुसिद्धम् ।
बाह्ये तत्[३] त्रैपुराख्यं नवतपननिभं स्वस्तिकं तत् त्रिभागे[४] ॥ २ ॥
स्वर्लोकाख्यमिदं देवि सर्वदेवैः प्रपूजितम् ।
साकारं[५] वह्निबीजं च सदैव मेषवाहनम् ॥ ३ ॥
रुद्रालयं हि तत्रैव महामोहस्य नाशनम् ।
भद्रकाली महाविद्या वामभागे च[६] शोभिता[७] ॥ ४ ॥
भद्रकाली महाविद्या सदा संहारकारिणी ।
ब्रह्मणा सृज्यते लोकः पाल्यते विष्णुरूपिणा ॥ ५ ॥
परदेवो रुद्ररूपः सदा संहारकारकः ।
संहरेद् रुद्ररूपेण[८] भद्रकालिकया सह ॥ ६ ॥
रुद्रस्य भावनाद् देवि किं न सिध्यति चण्डिके ।
यद्रूपं कथितं पूर्वं गोलकं[९] सर्वमोहनम् ॥ ७ ॥
तस्माद् वै सर्वतोभावे रुद्रलोकं[१०] चतुर्गुणम् ।
रुद्रलोकं महास्वर्गं गोलोकाद् वै चतुर्गुणम् ॥ ८ ॥
महामोक्षप्रदं नित्यं रुद्रं भस्माङ्गभूषणम्[११] ।
भद्रकाली महाविद्या रुद्रस्य वामदेशके ॥ ९ ॥
विष्णुना पाल्यते यद्यत्[१२] कालीरूपेण भुज्यते[१३] ।

१ कुलरूपकम् -ङ । व्योमरूपकम् –च, ज
२ पङ्कजैश्चातिशोभितम्
३ तं –क
४ तत् त्रिभागम् –च, ज
५ माकारं –च, ज
६ वामभागेन –च, ज
७ सुशोभिता -घ
८ संहाररुद्ररूपेण–च, ज
९ गोलके –ग, गोलोकं –च, ज
१० रुद्रलोके –क, ख, ग, घ
११ तस्याङ्गभूषणम् –क
१२ यद्वत् –च, ज
१३ युज्यते –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

अतः कालीं महादेवीं सदैव मुरलीधरः ।। १० ।।
आराध्य बहुयत्नेन वैकुण्ठाधिपतिर्भवेत् ।
गोलोकाधिपतिर्देवि स्तुतिभक्तिपरायणः ।। ११ ।।
कालिकायाः प्रसादेन[१४] स भवेल्लोकपालकः ।
लोकानां रक्षणार्थाय सस्त्रीको[१५] मुरलीधरः ।। १२ ।।
समाराध्य भद्रकालीं गोलोके निवसेत् सदा[१६] ।
प्रसादात्[१७] कालिकायाश्च भुज्यते विष्णुना सदा ।।
अतश्च[१८] पालको विष्णुर्महासत्त्वपरायणः [१९]।। १३ ।।

इति श्रीनिर्वाणतन्त्रे षष्ठः पटलः ।।[२०]

१४ कालीपादप्रसादेन –ङ, च, ज
१५ सश्रीको –च, ज
१६ तदा –च, ज
१७ प्रसादं –क, ख, घ, ङ। प्रसादे –ग
१८ ततश्च -ङ
१९ °°पराक्रमः -ङ
२० इति निर्वाणतन्त्रे षष्ठः । पटलः ।। ६ ।। –ख

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

छैटौँ पटल

[नेपाली भाषानुवाद]

श्रीशङ्करजी भन्नुहुन्छ–

यस पद्मको माथि घना नीलो वर्ण भएको, दशवटा पत्र भएको, जलले सहित भएको, अत्यन्त दुर्लभ महापद्म [रहेको छ] । [उक्त] कमल चन्द्रबिन्दुले युक्त तदेखि फसम्मका वर्णहरूले अत्यन्त सुशोभित छ ।। १ ।।

त्यस कमलको बिचमा बीजकोषमा सधैँ सुसिद्ध वह्निबीजको निवास रहेको छ । त्यसको बाहिर उदाउँदो सूर्यको जस्तो तेज भएको त्रैपुर नामक स्वस्तिक यन्त्र रहेको छ ।। २ ।।

हे दवी! यो सबै देवताहरूद्वारा पूजित स्वर्ग नामक लोक हो । सधैँ नै मेषवाहन वह्निबीज रकार [त्यहाँ रहेको छ] । त्यहाँ निश्चय नै महामोहलाई नाश गर्ने रुद्रालय [रहेको छ] । [रुद्रको] बायाँ भागमा भद्रकाली महाविद्या शोभित [भएर रहेकी छिन्] ।। ३–४ ।।

भद्रकाली महाविद्या सधैँ संहार गर्नेवाली हुन् । ब्रह्माद्वारा लोकको सृष्टि हुन्छ, विष्णुको रूपले पालन हुन्छ, रुद्ररूप परदेव सधैँ संहार गर्नेवाला हुन् । रुद्ररूपले भद्रकालिकाका साथमा संहार गर्दछन् ।। ५–६ ।।

हे चण्डिका! हे देवी! रुद्रको चिन्तन गर्नाले के कुरा सिद्ध हुँदैन र! पहिले सबैलाई मोहित गर्ने जुन रूपको गोलोक बताइयो त्यसभन्दा रुद्रलोक निश्चय नै सबै प्रकारले चार गुना [विशाल छ] । महास्वर्ग रुद्रलोक गोलोकभन्दा निश्चय नै चार गुना [विशाल छ] ।। ७–८ ।।

रुद्र नित्य, महामोक्ष प्रदान गर्नेवाला, भस्म नै शरीरको गहना भएका [छन्] । भद्रकाली महाविद्या रुद्रको बायाँ भागमा [रहेकी छिन्] ।। ९ ।।

विष्णुद्वारा जुन जुन कुरा पालन गरिन्छ [त्यो त्यो कुरा] कालीरूपद्वारा भोजन गरिन्छ । त्यसैले मुरलीधरले सधैँ नै बडो यत्नपूर्वक महादेवी कालीको आराधना गरेर वैकुण्ठका अधिपति बनेका हुन् । हे देवी! स्तुति एवं भक्तिपरायण गोलोकका ती अधिपति कालिकाको प्रसादले लोकपालक भएका हुन् । लोकहरूको रक्षाका लागि स्त्री[राधिका]ले सहित मुरलीधर सधैँ भद्रकालीको आराधना गरेर गोलोकमा बस्दछन् । कालिकाको प्रसादले नै विष्णुले सदा भोजन [आफ्नो कार्य सम्पादन] गर्दछन् । यसैले महासत्त्वपरायण विष्णु [लोकहरूका] पालक [हुन्] १०–१३ ।।

निर्वाणतन्त्रमा छैटौँ पटल पूरा भयो ।। ६ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सप्तमः पटलः

श्रीशङ्कर उवाच[१]

एतत्पद्मस्योर्ध्वदेशे विमलं पद्मसुन्दरम् ।
शोभितं द्वादशैः पत्रैः शोणबन्धूकसन्निभम्[२] ।। १ ।।
वाञ्छातिरिक्तफलदं शुद्धसिन्दूरसोदरम्[३] ।
पद्ममध्ये बीजकोषे षट्कोणं मण्डलं[४] शुभम् ।। २ ।।
मण्डलस्य मध्यदेशे वायुबीजं मनोहरम् ।
सजीवं वायुबीजं च वेदबाहुविराजितम् ।। ३ ।।
लोकत्रयस्य ईशानमीश्वरं सर्वपूजितम् ।[५]
या विद्या भुवनेशानि त्रिषु लोकेषु पूजिता ।। ४ ।।
ईश्वरस्य वामभागे सा देवी परितिष्ठति ।
महर्लोकमिदं भद्रे पूजास्थानं सुरेश्वरि ।। ५ ।।
अत्रैव मानसं यागं कुरुते योगवित्तमः[६] ।
सिन्दूरारक्तं चार्वङ्गि स्फाटिकैर्निर्मितं ततः[७] ।। ६ ।।
अतश्च[८] मानवाः सर्वे ज्योतिः संपरिपश्यति ।
सर्वावयवसंयुक्ता देवास्तिष्ठन्ति संततम् ।। ७ ।।
भूमिगाः परिपश्यन्ति चक्राकारं हि तेजसम्[९] ।
स्वर्लोकगामिनः सर्वे स्वर्गे तिष्ठन्ति पार्वति[१०] ।। ८ ।।[११]
अङ्गभेदं न पश्यन्ति स्थूलरूपनिरीक्षणम् ।
यथैव[१२] भूमिगा लोकाः प्रचरन्ति महीतले ।। ९ ।।
तथैव देवताः सर्वाः स्वर्गे तिष्ठन्ति पार्वति ।
भूर्लोके निवसेद् ब्रह्मा भुवर्लोके जनार्दनः ।। १० ।।

---

१ श्रीशिव उवाच –ख
२ शोणबन्धूकसन्निभम् –ख, ग, ङ । शोणवर्णसमन्वितम् –च, ज
३ °°°°°सन्निभम् –च, ज
४ षट्कोणमण्डलं –च, ज
५ यो पाठ मातृका घमा छैन ।
६ योगविन्नरः -ङ
७ यतः -ङ
८ ततश्च -ङ
९ तेजसाम् –च, ज
१० साकारं परिपश्यति –ङ, च, ज
११ यो पाठ मातृका क,ख,ग,घ र छमा छैन ।
१२ तथैव -च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

स्वर्लोके निवसेच्छम्भुः सदा संहारकारकः ।
ब्रह्मादीनां च ईशानः सर्वकर्ता च ईश्वरः ।। ११ ।।
सर्वस्वामीस्वरूपश्च[१३] सर्वकर्ता सुरेश्वरः ।
सृष्टिस्थितिलयादीनां कर्ता च परमेश्वरः[१४] ।। १२ ।।
गोलोकं कथितं देवि[१५] यद्रूपं शोभितं[१६] सदा ।
तस्माच्छतगुणं देवि महर्लोकं सुसुन्दरम् ।। १३ ।।
विस्तीर्णं च शतगुणं सर्वं शतगुणं शिवे ।
महर्लोकस्य माहात्म्यं किं वक्तुं शक्यते मया ।। १४ ।।
गोलोकस्य शतगुणं सर्वत्र परमेश्वरि[१७] ।
महर्लोके वसेद् यो हि सामान्यभावतत्परः ।। १५ ।।
तस्मादेव शतांशैकं गोलोकं[१८] मुरलीधरम्[१९] ।
तदाज्ञां प्राप्य सहसा सृज्यते पद्मयोनिना ।। १६ ।।
तदाज्ञया पाति लोकान् द्विभुजो मुरलीधरः ।
एवं हि रुद्ररूपेण संहरत्यखिलं जगत् ।। १७ ।।
सर्वकर्ता यतो देवि अतः स परमेश्वरः ।
ईश्वरः सर्वकर्ता च निर्गुणश्चाचलः[२०] शिवः ।। १८ ।।
भुवनेशीं विना देवि स्पन्दितुं नैव शक्यते ।
पङ्गुप्रायः सदा ईशो गन्तुं च[२१] न हि शक्यते ।। १९ ।।
भुवनेशीं समाराध्य सर्वस्वामी स[२२] ईश्वरः ।
अत एव महेशानि तथैव मोक्षदायिनी ।। २० ।।
विश्वमाता च सा देवी विश्वपालनकारिणी ।
मोक्षदा सर्वलोकानां मुक्तिदा विश्वमातृका ।। २१।।
भुवनेशीं विना ईशः किञ्चित् कर्तुं न शक्नुते[२३] ।
अत एव हि सा देवि मोक्षदा सर्वरूपिणी[२४] ।। २२ ।।

---

१३ सर्वस्वामित्वरूपं च –च, ज
१४ जगदीश्वरः -ङ
१५ सर्वं -ङ
१६ सहितं -ङ
१७ महर्लोकं सुसुन्दरं -ङ
१८ गोलोके –ङ, च, ज
१९ मुरलीधरः –च, ज
२० निर्गुणस्यालयः –च, ज
२१ गामित्वं न हि –क, ख, घ
२२ च –च, ज
२३ शक्यते –क, ख, ग, घ, ङ। शक्नुते –संशोधित पाठ।
२४ विश्वमातृका -ङ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

इति ते कथितं किञ्चिन्महर्लोकस्य[२५] लक्षणम् ।
समासेन परेशानि अथान्यच्छृणु[२६] सादरम् ।। २३ ।।

इति श्रीनिर्वाणतन्त्रे सप्तमः पटलः ।।[२७]

CC-0. In Public Domain. Digitization by eGangotri

---

२५ किञ्चिद् महर्लोकस्य –क, ख, ग, घ

२६ अथान्यत् शृणु –ग, घ

२७ इति निर्वाणतन्त्रे सप्तमः पटलः । –ख, ङ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सातौँ पटल

[नेपाली भाषानुवाद]

श्रीशङ्करजी भन्नुहुन्छ–

यो कमलको माथि बाह्रवटा पत्रहरूले शोभित भएको, रातो बन्धूक पुष्पको जस्तो छटा भएको, सफा, सुन्दर, अभिलाषा गरेभन्दा पनि बढी फल दिने, शुद्ध सिन्दूरजस्तै कमल [रहेको छ]। [उक्त] कमलको बिचमा बीजकोषमा राम्रो षट्कोण मण्डल [रहेको छ] ।। १–२ ।।

[उक्त] मण्डलको माझमा मनोहर वायुबीज [रहेको छ]। उक्त सजीव वायुबीज चार हातले [युक्त भएर] विराजमान छ ।। ३ ।।

उक्त कमलमा तीनै लोकका स्वामी, सबैद्वारा पूजित ईशान [ईश्वर][रहेका छन्] । हे त्रिभुवनकी स्वामिनी! तीनै लोकमा पूजित जुन विद्या छिन्, ती देवी ईश्वरको बायाँ भागमा बस्दछिन्। हे सुरेश्वरी! हे कल्याणी! यो पूजास्थान महर्लोक [हो] ।। ४–५ ।।

यहाँ नै योगलाई एकदम जान्नेले मानस योग गर्दछ। त्यसकारण सुन्दर अङ्ग भएकी हे देवी! त्यसपछि [उक्त योगविद्‌ले] ज्योति देख्दछ। सबै अवयवहरूले युक्त भएका मानिसहरू तथा देवताहरू सधैँ [त्यहाँ] रहन्छन्। भूमिमा रहेकाहरूले निश्चय नै तेजिलो चक्रको आकार देख्दछन्। हे पार्वती! सबै स्वर्गलोक जानेहरू स्वर्गमा रहन्छन्। ब्रह्मा भूर्लोकमा बस्दछन्, विष्णु भुवर्लोकमा बस्दछन्, संहारकारक ब्रह्मा आदिका प्रेरक, सर्वकर्ता ईश्वर, सबैका स्वामीस्वरूप पनि, सर्वकर्ता सुरेश्वर, सृष्टि, स्थिति, लय आदिका कर्ता परमेश्वर शम्भु सधैँ स्वर्गलोकमा बस्दछन्। जुन स्वरूपको सुशोभित गोलोक बताइयो हे देवी! त्यस (गोलोक)भन्दा सय गुणा सुन्दर, सय गुणा बढी फैलिएको र सबै [दृष्टिले]सय गुणा [उत्कृष्ट] महर्लोक [छ] ।। ६-१२ ।।

महर्लोकको माहात्म्य मैले के बताउन सक्छु र! हे परमेश्वरी! [महर्लोक सबै दृष्टिले] गोलोकको सय गुणा [विशाल छ] ।। १३ ।।

त्यस [महर्लोक] भन्दा सयको एक अंश मुरलीधर गोलोक [छ]। तिनको [महर्लोकमा बस्ने परमेश्वरको] आज्ञा पाएर तुरुन्त पद्मयोनि ब्रह्माले [जगत्‌को] सृजना गर्दछन्। तिनैको आज्ञाले दुई हात भएका मुरलीधरले लोकहरूको पालन गर्दछन्। त्यसैगरी निश्चय नै रुद्ररूपद्वारा अखिल जगत्‌को संहार गरिन्छ किनकि तिनी सर्वकर्ता हुन् त्यसैले हे देवी! ती परमेश्वर [हुन्] ।। १४–१६ ।।

ईश्वर सर्वकर्ता, निर्गुण, अचल, कल्याणस्वरूप [छन् तर] भुवनेशीविना चल्न चट्पटाउन पनि सक्तैनन्। [तिनीविना] ईश्वर सधैँ लङ्गडोजस्तै [नै हुन्], हिँडडुल गर्न पनि सक्तैनन्। भुवनेशीको आराधना गरेर ती ईश्वर सबैका मालिक [भएका हुन्]। त्यसैले हे महेश्वरी! ती देवी विश्वमाता, विश्वलाई पालन गर्नेवाली, सबै लोकहरूलाई मोक्ष दिने एवं विश्वमातृका हुन्। भुवनेशी विना ईश्वरले केही पनि गर्न सक्तैनन् त्यसैले

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हे देवी! तिनी निश्चय नै मोक्षदात्री तथा सर्वरूपिणी हुन् । हे परमेश्वरी! सङ्क्षिप्त रूपले महर्लोकको केही लक्षण तिमीलाई बताएँ । अब अरू आदरपूर्वक सुन ।। १७–२१ ।।

निर्वाणतन्त्रमा सातौँ पटल पूरा भयो ।। ७ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अष्टमः पटलः

श्रीशङ्कर उवाच

अस्योर्ध्वे निर्मलं पद्मं सर्वमोहनकारणम्[१] ।
षोडशैः पत्रकैर्युक्तं मोहान्धकारनाशनम्[२] ।। १ ।।
धूममध्ये यथा वह्निस्तथा ज्योतिर्मयं प्रिये ।
पद्ममध्ये वराटे च जनलोकं सुसुन्दरम् ।। २ ।।
महामोहान्धशमनं तद्बाह्ये चन्द्रमण्डलम् ।
देववृन्दैर्गायकैश्च[३] मुनिभिः परिशोभितम् ।। ३ ।।
गोलोकस्य लक्षगुणमिह स्थानं सुदुर्लभम् ।
देवत्वं च मनोज्ञं च विस्तीर्णं च तथा पुनः ।। ४ ।।
सर्वं लक्षगुणं देवि गोलोकान्नात्र संशयः ।
बीजकोषे मणिद्वीपे षट्कोणं यन्त्रमुत्तमम्[४] ।। ५ ।।
यन्त्रमध्ये च वृषभं[५] महासिंहार्धदेहकम् ।
तस्योपरि सदा गौरी दक्षभागे सदाशिवः ।। ६ ।।
त्रिनेत्रः पञ्चवक्त्रश्च प्रतिवक्त्रे त्रिलोचनः ।
विभूतिभूषिताङ्गश्च रजताचलसोदरः ।। ७ ।।
व्याघ्रचर्मधरो देवो मणिमालाविभूषितः[६] ।
लोकानामिष्टदाता च लोकानां भयनाशनः ।। ८ ।।
लोकानां मुक्तिजनको लोकानां ज्ञानदायकः ।
आराधकस्य ब्रह्मत्वं दायको विष्णुपूजितः ।। ९ ।।
सर्वानन्दकरो देवोऽर्धनारीश्वरो विभुः ।
क्वचिज्ज्योतिर्मयो देवः क्वचिदाकारवर्जितः[७] ।। १० ।।
देवानां पूज्यरूपश्च देवानां स्वामिरूपकः ।
भक्तस्य मुक्तिदो नित्यं[८] विष्णुत्वं दायकः प्रभुः[९] ।। ११ ।।
<u>बिल्वपत्रैः पूजकस्य</u> निजसायुज्यदायकः ।

१ सर्वमोहस्य कारणं -ङ
२ माहान्धकारनाशनम् –च, ज
३ °°गाथकैश्च -घ, ङ
४ षट्कोणयन्त्रमुत्तमम् –च, ज
५ वृत्ताभं –च, ज
६ देवः फणि°°°°°° –च, ज
७ °°धारवर्जितः -ङ
८ नित्यो -घ, ङ
९ विष्णुत्वदायको विभुः –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

गोलोकाधिपतिं कृत्वा भक्तं रक्षति यः शिवः ।। १२ ।।
CC-0. In Public Domain. Digitization by eGangotri

तस्य देवस्य माहात्म्यं किं विस्तारेण चण्डिके[10] ।
या गौरी लोकमाता च शम्भोरर्धाङ्गधारिणी ।। १३ ।।
त्रिगुणा सा महागौरी गुणैकेन पिनाकधृक् ।
तस्याः सङ्गं समासाद्य सर्वकर्ता[11] सदाशिवः ।। १४ ।।

इति निर्वाणतन्त्रे अष्टमः पटलः ८ ।।[12]

१० विस्तारेण च किं प्रिये –च, ज
११ सर्वकर्मा -ङ
१२ इति श्रीनिर्वाणतन्त्रे चण्डिकाशंकर संवादे अष्टमः पटलः -ङ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आठौँ पटल

[नेपाली भाषानुवाद]

श्रीशङ्करजी भन्नुहुन्छ–

यस (पद्म)को माथि सबैलाई मोहमा राख्ने कारणस्वरूप, सोह्र पत्रले युक्त, मोहस्वरूप अन्धकारलाई नाश गर्ने निर्मल पद्म रहेको छ ।। १ ।।

हे प्रिये! धूवाँको माझमा जसरी [झल्झलाउँदो] आगो [रहन्छ] त्यसरी नै कमलको भित्र डाँठमा अति सुन्दर जनलोक [रहेको छ] ।। २ ।।

त्यस (जनलोक)को बाहिर देवगण, गायक (गन्धर्वगण) तथा मुनिहरूले सुशोभित महामोहस्वरूप अन्धकारलाई शमन गर्ने चन्द्रमण्डल रहेको छ ।। ३ ।।

यो अति दुर्लभ स्थान गोलोकको लाख गुणा विस्तृत, देवत्व तथा मनोज्ञयुक्त छ । हे देवी! गोलोकभन्दा सबै [कुरामा] लाख गुणा [बढी छ], यसमा कुनै सन्देह छैन । बीजकोषमा मणिद्वीपमा षट्कोणले युक्त उत्तम यन्त्र [रहेको छ] ।। ४–५ ।।

यन्त्रको माझमा महासिंहको आधा [परिमाण] शरीर भएको वृषभ [रहेको छ] । त्यसमाथि गौरी र [उनको] दाहिने भागमा सधैँ सदाशिव [रहन्छन्] ।। ६ ।।

[ती सदाशिव] तीन आँखा भएका, पाँच मुख भएका, हरेक मुखमा तीन आँखा भएका, भस्मले शरीर सिँगारिएका, चाँदीको पर्वतजस्तै [सेता], बाघका छाला लगाएका, मणिमालाले सिँगारिएका, लोकहरूका इष्टदाता तथा भयलाई नाश गर्ने भएका, लोकहरूलाई मुक्ति दिने तथा ज्ञान दिने भएका, आराधकलाई ब्रह्मत्व प्रदान गर्ने भएका, विष्णुद्वारा पूजित [छन्] ।। ७–९ ।।

[ती सदाशिव] सबैलाई आनन्द दिने, अर्धनारीश्वर, व्यापक, कहिले ज्योतिर्मय स्वरूप भएका, कहिले आकारले रहित भएका, देवताहरूका पूज्य तथा स्वामिरूप भएका, भक्तलाई सधैँ मुक्ति दिने तथा विष्णुत्व प्रदान गर्ने, सबैका मालिक [हुन्] ।। १०–११ ।।

बेलपत्रले पूजा गर्नेलाई आफ्नो सायुज्यरूप [मोक्ष] दिने जुन सदाशिव हुन्, ती [मुरलीधर कृष्णलाई] गोलोकाधिपति बनाएर भक्तको रक्षा गर्दछन् । हे चण्डिका! त्यस्ता देवको माहात्म्य विस्तारले किन? गौरी जो लोकमाता, शम्भुको आधा अङ्ग धारण गर्ने भएकी, त्रिगुण स्वरूपकी [छिन् ती] महागौरी [हुन्] । तिनैको साथ राम्ररी पाएर [तिनको] एउटा गुणले पिनाक धनु लिने सदाशिव सर्वकर्ता [भएका हुन्] ।। १२–१४ ।।

निर्वाणतन्त्रमा आठौँ पटल पूरा भयो ।। ८ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

नवमः पटलः

CC-0.In Public Domain. Digitization by eGangotri

श्रीशङ्कर उवाच

एतत्पद्मस्योर्ध्वदेशे ज्ञानपद्मं सुदुर्लभम् ।
पत्रद्वयसमायुक्तं[१] पूर्णचन्द्रस्य मण्डलम् ।। १ ।।
पद्ममध्ये बीजकोषे स्मरेच्चिन्तामणिं पुरीम् ।
तन्मध्ये नवकोणं च यन्त्रं परमदुर्लभम् ।। २ ।।
शम्भुबीजं हि तन्मध्ये साकारं[२] हंसरूपकम्[३] ।
हंसः परंब्रह्मरूपः साकारः शिवरूपकः ।। ३ ।।
तारश्चक्रुर्वरारोहे[४] निगमागमपक्षावान् ।
शिवशक्तिपदद्वन्द्वं बिन्दुत्रयविभूषितम्[५] ।। ४ ।।
विहारश्चास्य हंसस्य व्योमपङ्कजपूरिते[६] ।
एवं हंसो मणिद्वीपे तस्य क्रोडे परः शिवः ।। ५ ।।
वामभागे सिद्धकाली सदानन्दस्वरूपिणी ।
तस्याः प्रसादमासाद्य सर्वकर्ता महेश्वरः ।। ६ ।।
तपोलोकमिदं भद्रे सर्वदेवसुदुर्लभम्[७] ।
यत्र ब्रह्मादयो देवा ध्यानयोगं समभ्यसेत्[८] ।। ७ ।।
मनसापि न लभ्येत योगेन तपसा न च ।
तपोलोकं गोलकस्य[९] चतुर्लक्षगुणं शिवे ।। ८ ।।
ब्रह्मलोके च ये देवा वैकुण्ठे ये सुरादयः ।
शम्भुलोके वसेद् यो यस्ते च भक्तिपरायणाः ।। ९ ।।
तपसापि न लभ्येत तपोलोकमतः शिवे ।
तपोलोकसमो नास्ति लोकमध्ये सुलोचने ।। १० ।।
सालोक्यं हि महर्लोके[१०] सारूप्यं जनलोकके ।
सायुज्यं च तपोलोके निर्वाणं हि तदूर्ध्वके ।। ११ ।।

---

१ पत्रत्रय॰॰ -ङ
२ साकारः –च, ज
३ हंसरूपिणम् -घ । हंसरूपकः –च, ज
४ तालश्चक्षु॰॰ -ङ
५ ॰॰॰॰विलोचनम् –ङ, च, ज
६ हेम॰॰॰॰॰॰ –ङ, च, ज
७ सर्वलोकस्य दुर्लभम् -ङ । सर्वदेवस्य दुर्लभम् –च, ज
८ सदाभ्यसेत् –च, ज
९ गोलोकस्य –च, ज
१० सालोक्यं महर्लोकः स्यात् –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अतो ब्रह्मादयो देवास्तपोलोकार्थिनः सदा ।
तस्य लोकस्य माहात्म्यं मया वक्तुं न शक्यते ।। १२ ।।
इति ते कथितं कान्ते स्वर्गषट्कस्य[११] लक्षणम् ।
यज्ज्ञानादमरत्वं च जीवन्मुक्तश्च साधकः ।। १३ ।।
यज्ज्ञानाजननीगर्भं न विशन्ति कदाचन ।
आयुरारोग्यमैश्वर्यं सम्प्राप्नोति न संशयः ।। १४ ।।
पुराणानि च सर्वाणि मयैवोक्तानि पार्वति ।
एतद्रूपं च तन्मध्ये व्यक्तरूपो न विद्यते ।। १५ ।।
गूढज्ञानं च तन्मध्ये अतः किञ्चिन्न बुध्यते ।
एवं हि वेदशास्त्रेषु ज्ञानमध्ये[१२] सुलोचने ।। १६ ।।
शब्दज्ञानं यतो नास्ति अतः किञ्चिन्न बुध्यते ।
अष्यदशपुराणानि साङ्गं वेत्ति च यो नरः ।। १७ ।।
तस्य स्थाने पुराणानि[१३] सदा श्रवणमाचरेत् ।
मूढे च अल्पपाठज्ञे[१४] न श्रोतव्यं कदाचन ।। १८ ।।
शास्त्रस्य लक्षणं ह्येतद् व्याख्या चान्या प्रकाशते ।
शब्दः ब्रह्मस्वरूपश्च मम वक्त्राद् विनिर्गतः ।। १९ ।।
सन्देहो नैव कर्तव्यो यदि मुक्तिं प्रयच्छति ।
सन्देहात् पामरो याति रौरवं पितृभिः सह ।। २० ।।
ज्ञानं च निर्मलं कृत्वा बुद्धिं च निर्मलां ततः ।
महाभक्तियुतो भूत्वा सर्वप्राणिहिते रतः ।। २१ ।।
शब्दब्रह्ममयं ज्ञात्वा[१५] देवि श्रृणोति तन्त्रकं यदि[१६] ।
तदामुक्तिमवाप्नोति सत्यं सत्यं न संशयः ।। २२ ।।
अष्यदश पुराणानि श्रवणेनैव यत्फलम् ।
चतुर्वेदानि साङ्गानि श्रवणेनैव यत्फलम् ।। २३ ।।[१७]
मेरुतुल्यं सुवर्णं[१८] च गुरवे ब्रह्मरूपिणे ।
सशस्यां परमेशानि सप्तद्वीपां वसुन्धराम् ।। २४ ।।
प्रदद्याद् भक्तिभावेन यदि स्याद् वेदपारगः ।

---

११ °°लोकस्य -ङ
१२ गानमध्ये –क, ख, ग, घ
१३ पुराणानां –च, ज
१४ चुम्बके चाल्प°° -घ
१५ देवि –च, ज
१६ तन्त्रविद्यदि –च, ज
१७ यो पाठ मातृका 'ङ'मा छैन ।
१८ मेरुतुल्यसुवर्णानि -ङ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

तस्माद् वै परमेशानि फलं बहुविधं शिवे ।। २५ ।।

CC-0.In Public Domain. Digitization by eGangotri

अस्य तन्त्रस्य चार्वङ्गि श्रृणोति पटलं यदि ।
तत्फलात् कोटिगुणितं फलं स लभते ध्रुवम् ।। २६ ।।

इति निर्वाणतन्त्रे नवमः पटलः[१९]

---

१९ इति श्रीनिर्वाणतन्त्रे नवमः पटलः –घ, ङ, च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नवौँ पटल

[नेपाली भाषानुवाद]

श्रीशङ्करजी भन्नुहुन्छ–

यो पद्मको माथि अति दुर्लभ दुइवटा पत्रले युक्त पूर्णचन्द्रको मण्डलस्वरूप ज्ञानपद्म [रहेको छ] ।। १ ।।

पद्मको बिचमा बीजकोषमा चिन्तामणि पुरीको चिन्तन गर्नू । त्यसको माझमा परम दुर्लभ नवकोण यन्त्र [रहेको छ] ।। २ ।।

त्यसको माझमा साकार तथा हंसरूपक शम्भुबीज [रहेको छ] । हंस परब्रह्म रूप हो भने साकार शिवरूप हो ।। ३ ।।

हे सुन्दर नितम्ब भएकी देवी! निगम तथा आगम रूप पखेटा भएको ॐ बनाए । तीनवटा बिन्दुले सिँगारिएको शिव र शक्ति दुई पद [छन्] ।। ४ ।।

शून्य कमलले भरिएको मणिद्वीपमा हाँस डुलाइ [हुन्छ] । हाँस यस्तो छ, त्यसको छेवैमा पर शिव [रहन्छन्] ।। ५ ।।

[शिवको] बायाँ भागमा सदैव आनन्दस्वरूपिणी सिद्धिकाली [रहन्छिन्] । तिनको कृपा पाएर महेश्वर सर्वकर्ता [भएका हुन्] । हे कल्याणी! यो सबै देवताहरूका [लागि पनि] अतिदुर्लभ तपोलोक [हो], जहाँ ब्रह्मा आदि देवताहरू ध्यानयोगको अभ्यास गर्दछन् ।। ६–७ ।।

[यो तपोलोक] न योगले पाइन्छ न त तपस्याले अथवा मनले [पाइन्छ] । हे कल्याणी! तपोलोक गोलोकभन्दा चार लाख गुणा [विस्तीर्ण छ] ।। ८ ।।

ब्रह्मलोकमा जो देवताहरू बसेका छन्, वैकुण्ठमा जो देवताहरू बसेका छन्, शम्भुलोकमा जो जो बसेका छन् तथा जो भक्तिपरायण छन्, [तिनले] तपस्याबाट पनि तपोलोक प्राप्त गर्दैनन् त्यसैले हे कल्याणी! हे सुन्दर आँखा भएकी देवी! लोकहरूमध्ये तपोलोक समान अरू छैन ।। ९–१० ।।

महर्लोकमा सालोक्य, जनलोकमा सारूप्य, तपोलोकमा सायुज्य, त्यसभन्दा माथि निर्वाण [प्राप्त हुन्छ] त्यसैले ब्रह्मा आदि देवताहरू सधैँ तपोलोकको चाहना राख्ने हुन्छन् । त्यस लोकको माहात्म्य मद्वारा बताउन सकिँदैन ।। ११–१२ ।।

हे प्रिये! तिमीलाई छवटा स्वर्गको लक्षण बताइयो जसलाई जान्नाले साधकले अमरत्व [प्राप्त गर्दछ]एवं [ऊ] जीवन्मुक्त [बन्दछ] । जसलाई जान्नाले कहिल्यै पनि [मनुष्यहरू] माताको गर्भमा प्रवेश गर्दैनन् [फेरि जन्म लिँदैनन्] । सो साधकले आयु, आरोग्य, ऐश्वर्य प्राप्त गर्दछ, [यसमा] शंका छैन ।। १३–१४ ।।

हे पार्वती! सबै पुराणहरू मैले नै बताएको हुँ । तिनीहरू भित्र यो रूप अव्यक्त रूपले रहेको छ । तिनीहरू

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भित्र गुप्त ज्ञान [रहेको छ] त्यसैले केही बुझिँदैन । त्यसैगरी हे सुन्दर नयन भएकी देवी! वेदशास्त्रहरूमा [रहेको] ज्ञानभित्र शब्दज्ञान नभएकोले केही पनि बुझिँदैन । अठार पुराण, सबै अङ्गले सहित वेद जाने पनि केही पनि बुझिँदैन ।। १५–१७ ।।

त्यसको सट्टा पुराणहरू सधैँ सुन्नू । मूढ र अल्पपाठ जान्नेसँग कहिले पनि नसुन्नू ।। १८ ।।

शास्त्रको लक्षण यो [हो], व्याख्या चाहिँ अर्को प्रकाशित गरिन्छ । ब्रह्मस्वरूप शब्द मेरो मुखबाट निस्किएको हो । यदि [कसैले] मुक्ति चाहन्छ भने [यसमा] सन्देह गर्नु हुँदैन । सन्देह गर्नाले [त्यो] पामर पितृहरूका साथमा रौरव [नरक]मा जान्छ ।। १९–२० ।।

[आफ्नो] ज्ञानलाई निर्मल गरेर, बुद्धिलाई निर्मल गरेर त्यसपछि खूब भक्तियुक्त भएर सबै प्राणीको कल्याणमा तत्पर रहँदै यदि तन्त्रलाई शब्दब्रह्ममय जानेर सुन्दछ [भने] तब मुक्ति प्राप्त गर्दछ, साँचो [हो], साँचो [हो], [यसमा] संशय छैन ।। २१–२२ ।।

अठार पुराणहरू सुन्नाले जुन फल [प्राप्त हुन्छ], [छ नै वटा] अङ्गले सहित चार वेद सुन्नाले जुन फल [प्राप्त हुन्छ], हे परमेश्वरी! ब्रह्मरूपी गुरुलाई मेरुतुल्य सुन, अन्नले सहित सात द्वीप भएकी पृथिवी [नै] भक्तिभावले यदि दिन्छ र वेदशास्त्रमा पारङ्गत बन्छ [भने पनि] हे परमेश्वरी! हे कल्याणी! हे सुन्दर अङ्ग भएकी देवी! यस तन्त्रको [एक] पटल [मात्रै पनि] यदि सुन्छ [भने] त्यसभन्दा धेरै फल, त्यो फलभन्दा करोड गुना फल निश्चय नै उसले प्राप्त गर्दछ ।। २३–२६ ।।

निर्वाणतन्त्रमा नवौँ पटल पूरा भयो ।। ९ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal.

CC-0.In Public Domain. Digitization by eGangotri

दशमः पटलः

श्रीशङ्कर उवाच
ज्ञानपद्मस्योर्ध्वदेशे सहस्रदलपङ्कजम् ।
अधोवक्त्रं महावक्त्रं[१] सुमेरोर्मूर्ध्नि संस्थितम् ।। १ ।।
यस्य पत्रं महेशानि सर्वशक्तिसमन्वितम् ।
शुक्लं रक्तं तथा पीतं कृष्णं हरितमेव च ।। २ ।।
विचित्रं चित्ररूपेण[२] नानावर्णेन शोभितम् ।
शुक्लं क्षणात् क्षणाद्[३] रक्तं क्षणात्[४] पीतं सुशोभनम् ।। ३ ।।
कस्मिन् क्षणे शुक्लवर्णं हरितं वर्णमुत्तमम् ।
चित्ररूपं च[५] चार्वङ्गि धत्ते कस्मिन् क्षणे प्रिये ।। ४ ।।
एवं नानाविधैर्देवि तत्पद्मं शोभितं सदा ।
यथैव गोलकं[६] धाम प्रतिपत्रे तथैव हि ।। ५ ।।
गोलोकाधिपतिस्तत्र[७] भक्तिभावपरायणः ।
कैलासाधिपतिर्देवि ध्यानयोगं सदाभ्यसेत् ।। ६ ।।
एवं ब्रह्मादयो देवा इन्द्राद्यास्त्रिदशेश्वराः ।
स्तुतिभक्तिपराः सर्वे दिव्यभावैः सदा स्थिताः ।। ७ ।।
लक्षलक्षं महेशानि तत्रैव[८] मुरलीधरः ।
शतलक्षं शिवस्तत्र ब्रह्मा लक्षशतं प्रिये ।। ८ ।।
प्रत्यहं[९] परमेशानि ब्रह्माण्डा बहवो भवेत् ।
तन्मध्ये स्थापयेद् ब्रह्मा तत्रैव[१०] कमलापतिम् ।। ९ ।।
शिवं बहुविधाकारं तत्रैव स्थापनं चरेत् ।
एवं हि परमेशानि नानाशक्तिं प्रविन्यसेत् ।। १० ।।
प्रतिब्रह्माण्डमध्ये तु ब्रह्मादिदेवतात्रयम् ।
नानाशक्तियुतं कृत्वा ब्रह्माण्डस्थापनं चरेत् ।। ११ ।।

---

१ महापद्मं -घ
२ नानाविचित्ररूपेण –च, ज
३ क्षणे क्षणे –च, ज
४ क्षणे –च, ज
५ हि –च, ज
६ तथैव गोलोकं –च, ज
७ गोलोकस्य पतिस्तत्र –च, ज
८ तथैव –च, ज
९ प्रत्यक्षं –ग
१० तथैव –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

ब्रह्मपद्मे पृथिव्यां तु वर्तन्ते मानुषादयः ।
CC-0. In Public Domain. Digitization by eGangotri
ते सर्वे देवि ब्रह्माण्डास्तन्मध्ये भुवनानि च ।। १२ ।।
पातालसप्तकं तत्र तत्रैव स्वर्गसप्तकम् ।
एवं क्रमे[११] सर्वदेहे भुवनानि चतुर्दशः ।। १३ ।।
प्रतिदेहं परेशानि ब्रह्माण्डो नात्र संशयः ।
कथितं बाह्यदेशस्य ब्रह्माण्डस्य च लक्षणम् ।। १४ ।।
यन्मध्ये वर्तते साक्षाद् भुवनानि चतुर्दश ।
तदेव विग्रहं देवि महाब्रह्माण्डमध्यगम् ।। १५ ।।
एवं बहुविधं देवि तत्र ब्रह्माण्डके क्षितौ ।
बृहद्ब्रह्माण्डे ये सर्वे तेऽपि जन्यः शरीरिणः ।। १६ ।।
पृथिव्यां तेऽपि वर्तन्ते जन्तोराकारविग्रहाः ।
महाब्रह्माण्डमध्ये तु बृहद्ब्रह्माण्डस्तिष्ठति ।। १७ ।।
तन्मध्ये जन्तवो देवि तन्मध्ये भुवनानि च ।
सृष्टिमार्गेण भेदोऽस्ति स्थूलसूक्ष्मादिभेदतः ।। १८ ।।
महाब्रह्माण्डके यद् यत् प्रकारं परमेश्वरि ।
तत्तत् सर्व हि देवेशि बृहद्ब्रह्माण्डमध्यतः ।। १९ ।।
तद्रूपं च देहमध्ये भुवनानि चतुर्दश ।
सृष्टिप्रकारे ब्रह्माण्डे[१२] भेदो नास्ति सुनिश्चितम् ।। २० ।।
स्थूलं क्षुद्रो हि चार्वङ्गि भेदकः परिचायकः ।
पद्ममध्ये बीजकोषे भुवनानि चतुर्दश ।। २१ ।।[१३]
स्थानं बहुविधाकारं सर्वदेवस्य चाश्रयम् ।
तन्मध्ये सत्यलोकं च महामोक्षस्य कारणम् ।। २२ ।।
दशकान्तेन[१४] स्वर्णेन निर्मितं चक्रपाणिना ।
दिक्षु तोयमण्डलं च यथा पूर्णेन्दुमण्डलम् ।। २३ ।।
परितः पारिजातानि[१५] मध्ये कल्पद्रुमं पुनः ।
कल्पवृक्षस्य निकटे ज्योतिर्मण्डलमुत्तमम्[१६] ।। २४ ।।
उद्यदादित्यसङ्काशं चतुर्द्वारविभूषितम्[१७] ।
मन्दवायुसमायुक्तं गन्धधूपैरलङ्कृतम् ।। २५ ।।

---

११ क्रमात् –च, ज
१२ सृष्टिप्रकारब्रह्माण्डे –च, ज
१३ सृष्टिप्रकारेदेखि चतुर्दशः सम्मको पाठ मातृका 'ङ'मा छैन ।
१४ दशकास्तेन –च, ज
१५ परिजानीयान् –च, ज
१६ °मन्दिर°° –क, ख, ग, घ, ङ
१७ °समन्वितम् -ङ । चतुर्द्वारिविभूषितम् –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तन्मध्ये वेदिका देवि रत्नसिंहासनं प्रिये ।
महाकाली च परमा[१८] चणकाकाररूपतः ।। २६ ।।
माययाच्छादितात्मानं तन्मध्ये समभागतः ।
महारुद्रः स एवात्मा महाविष्णुः स एव हि ।। २७ ।।
महाब्रह्मा स एवात्मा नाममात्रविभेदकः[१९] ।
एकमूर्तिस्त्रयो नाम्ना[२०] ब्रह्मविष्णुमहेश्वराः ।। २८ ।।
नानाभावे मनो यस्य तस्य मोक्षो न विद्यते ।
ब्रह्माण्डास्तत्र जायन्ते लक्षं लक्षं सुलोचने ।। २९ ।।
तत्र ब्रह्मा तत्र हरिस्तत्र रुद्रः प्रविन्यसेत् ।
एवं ब्रह्माण्डनिर्माणं कृत्वा विष्णुः सनातनः ।। ३० ।।
सजीवमूर्तिं निर्माय यथा जन्तोश्च विग्रहम् ।
एवं ब्रह्माण्डविविधं[२१] नित्यं सृजति निर्गुणः ।। ३१ ।।
निर्गुणो[२२] बिन्दुरूपश्च सिद्धिकारण एव[२३] हि ।
केचिद् वदन्ति तं ब्रह्मा कैश्चिद् विष्णुः प्रकथ्यते ।। ३२ ।।
केचिद् रुद्रो महापूर्व एको देवो निरञ्जनः ।
आद्याशक्तियुतो देवश्चणकाकाररूपकः ।। ३३ ।।
इन्द्रजालस्य दीपाभः चन्द्रसूर्याग्निरूपकः ।
महाज्योतिर्निराकारः सुदग्धश्चापगोलकः ।। ३४ ।।
सत्यलोके बीजकोषे चिन्तामणिगृहे शुभे ।
ध्यायेन्निरञ्जनं देवं[२४] रत्नसिंहासनोपरि ।। ३५ ।।
तस्यान्तिके[२५] निजगुरुं पूजाध्यानपरायणम् ।
सकान्तं पूजयेद् देवं रजताचलसोदरम् ।। ३६ ।।
सुवक्त्रं चारुवदनं सुप्रकाशस्वरूपिणम् ।
एवं कान्तायुतं देवं स्वमूर्तिस्थं[२६] विचिन्तयेत् ।। ३७ ।।
यथा दर्पणगर्भे तु परिपश्यन्ति पर्वतम् ।
सहस्रारे महापद्मे तथा देवं विचिन्तयेत् ।। ३८ ।।
<u>परं ब्रह्मालयं ह्येतत्</u> परं मोक्षालयं प्रिये ।

१८ महाकाली परमात्मा –ङ, च, ज
१९ नाममात्रविभेदतः –ङ, च, ज
२० एकमूर्तिस्त्रयं नाम –च, ज
२१ ब्रह्माण्डं विविधं –च, ज
२२ निर्गुणे –च, ज
२३ सिद्धिकारणमेव –च, ज
२४ देवि –च, ज
२५ तस्यान्तिकं –ग
२६ स्वमूर्ध्निस्थं –ङ, च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निर्गुणस्यालयं साक्षान्महाकाल्यालयं शिवे ।। ३९ ।।
तत्रैव[२७] वर्तते नित्यो निराकारश्च निश्चलः ।
यस्य रूपं परानन्दं परापरजगत्पतिः[२८] ।। ४० ।।
नित्यानन्दपरा देवी काली कालप्रकाशिनी ।
आद्याशक्तिर्महाकाली देवनिर्वाणकारिणी[२९] ।। ४१ ।।
जायन्ते च क्षितौ वृक्षा[३०] यथा पृथ्व्यां प्रलीयते ।
तोयात्तु[३१] बुद्बुदं जातं यथा तोये विलीयते ।। ४२ ।।
जलदे तडिदुत्पन्नं[३२] लीयते च यथा घने ।
तथा ब्रह्मादयो देवाः कालिकायाः[३३] प्रजायते ।। ४३ ।।
तथा प्रलयकाले तु पुनस्तस्यां प्रलीयते[३४] ।
शक्तिज्ञानं विना देवि मुक्तिर्हास्याय कल्पते ।। ४४ ।।
एकांशेन भवेद् ब्रह्मा एकांशेन जनार्दनः ।[३५]
एकांशेन भवेच्छम्भुः कालिकायाः सुलोचने ।। ४५ ।।
अपरा सा महाकाली नद्यादीनां समुद्रवत् ।
गोष्पदे च यथा तोयं ब्रह्माद्या देवतास्तथा ।। ४६ ।।
गोष्पदं किं विजानीयात्[३६] समुद्रस्य जलं शिवे ।
ते च[३७] ब्रह्मा न जानन्ति[३८] विष्णुः किं वेत्ति शङ्करः ।। ४७ ।।
सृष्टिकर्तुं[३९] यथा काल्या[४०] तन्यन्ते च सुरादयः ।
तथा प्रलयकाले तु पुनस्तस्यां प्रलीयते ।। ४८ ।।
अतो निर्वाणदा काली पुरुषः स्वर्गदायकः ।
दक्षिणस्यां दिशि स्थाने संस्थितश्च रवेः सुतः ।। ४९ ।।
कालीनाम्ना पलायन्ते[४१] भीतियुक्ताः समन्ततः ।

२७ तथैव –च, ज
२८ परापरजगत्पतिम् –च, ज
२९ देवनिर्माणकारिणी –ङ, च, ज
३० जायते च क्षितौ ब्रह्मा –च, ज
३१ तोयाश्च –च, ज
३२ तडिदुत्पन्ना –च, ज
३३ कालिकायां –च, ज
३४ पुनस्तस्याः प्रजायते –क, ख, ग, घ
३५ यो पाठ मातृ 'ङ'मा छैन ।
३६ न जानीयात् –च, ज
३७ तेन –ङ, च, ज
३८ जानाति –ङ, च, ज
३९ सृष्टिकर्ता –ङ, च, ज
४० काल्यां –च, ज
४१ पलायेत –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ततः सा दक्षिणा नाम्ना त्रिषु लोकेषु गीयते ।। ५० ।।
पुरुषो दक्षिणः प्रोक्तो वामा शक्तिर्निगद्यते ।
वामया दक्षिणं जित्वा[४२] महामोक्षप्रदायिनी ।। ५१ ।।
अतः सा दक्षिणा नाम्नी[४३] त्रिषु लोकेषु गीयते ।
निर्गुणं पुरुषं काल्या सृज्यते लुप्यते पुनः ।। ५२ ।।
अतः सा दक्षिणा नाम्नी त्रिषु लोकेषु गीयते ।[४४]
वैष्णवी[४५] या महाविद्या कालिका जगदम्बिका ।। ५३ ।।
साकाररूपा सा काली[४६] चणकाकाररूपिणी ।
हस्तपादादिरहिता सोमसूर्याग्निरूपिणी[४७] ।। ५४ ।।
तस्याः स्थानं हि कथितं सत्यलोकं वरानने ।
यत् स्थानं सर्वदेवस्य प्रार्थनीयं सदानघे ।। ५५ ।।
तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेऽधुना ।
सहस्रदलपद्मस्य चैकपत्रे सुलोचने ।। ५६ ।।
सहस्रगोलकं[४८] धाम अतो वक्तुं न शक्यते ।
जन्मान्तरसहस्रेण जिह्वाकोटिशतेन च ।। ५७ ।।
तद् वक्तुं नहि शक्नोमि एकपत्रस्य शोभनम् ।
अतस्त्वं हि वरारोहे विरता भव पार्वति ।। ५८ ।।
किञ्जल्कमध्ये या शोभा[४९] किं वक्तुं शक्यते मया ।
तन्मध्ये कर्णिकां देवि तन्मध्ये बीजकोषकम् ।। ५९ ।।
बीजकोषस्य मध्ये तु सुधासागरमुत्तमम्[५०] ।
लक्षयोजनविस्तारं सुशुभं तोयमण्डलम् ।। ६० ।।
तन्मध्ये तु मणिद्वीपं सहस्रयोजनं शिवे ।
परितः पारिजातानि कदम्बवनमुत्तमम् ।। ६१ ।।
मध्ये कल्पद्रुमं तत्र ज्योतिर्मन्दिरमुत्तमम् ।
चतुर्द्वारसमायुक्तं हेमप्राकारभूषितम् ।। ६२ ।।
मन्दवायुसमायुक्तं गन्धपुष्पसमन्वितम्[५१] ।

४२ वामाया दक्षिणा जिह्वा –च, ज
४३ नाम्ना –च, ज
४४ यो पाठ मातृका 'ङ'मा छैन ।
४५ वैखरीयं -ङ। वैश्वरी –च, ज
४६ देवी –च, ज
४७ चन्द्रसूर्याग्निरूपिणी –च, ज
४८ सहस्रगोलोकं –च, ज
४९ सा देवी –च, ज
५० सुरा° -ङ
५१ गन्धधूपसमन्वितम् –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

देवकन्यासहस्राणि परिचर्यापरायणाः ।। ६३ ।।
CC-0. In Public Domain. Digitization by eGangotri
तन्मध्ये वेदिकां देवि पञ्चाशदक्षरात्मिकाम् ।[५२]
तस्योपरि महेशानि रत्नसिंहासनं शिवे ।। ६४ ।।
महाकाली महारुद्रश्चणकाकाररूपकः ।
इन्द्रजालस्य दीपाभं महाज्योतिः सनातनम् ।। ६५ ।।
इति ते कथितं कान्ते सप्तस्वर्गं क्रमेण हि ।
श्रुत्वा गोपय यत्नेन न प्रकाश्यं कदाचन ।। ६६ ।।
अतिस्नेहेन देवेशि तव स्थाने प्रकाशितम् ।
सङ्क्षेपेण मयाऽप्युक्तं[५३] विस्तारे न हि शक्यते ।। ६७ ।।

इति श्रीचण्डिकाशङ्करसंवादे निर्वाणतन्त्रे सत्यलोककथनं नाम दशमः पटलः ।। १० ।।[५४]

५२ यो पाठ मातृका 'ङ'मा छैन ।
५३ समायुक्तं -ङ
५४ इति श्रीनिर्वाणतन्त्रे देवीश्वरसंवादे दशमः पटल -ङ । इति श्रीनिर्वाणतन्त्रे सत्यलोककथनं नाम दशमः पटलः ।। -च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दशौँ पटल

[नेपाली भाषानुवाद]

श्रीशङ्करजी भन्नुहुन्छ–

ज्ञानपद्मको माथि सुमेरुको शिरोभागमा तलतिर मुख फर्केको महावक्त्र सहस्रदल कमल रहेको छ जसको पात हे महेश्वरी! सबै शक्तिले युक्त भएको सेतो, रातो, पहेँलो, कालो, हरियो, चित्र विचित्र प्रकारका विभिन्न रङ्गले शोभित, छिनमा सेतो, छिनमा रातो, छिनमा पहेँलो [रङ्गले] सिँगारिएको छ ।। १–३ ।।

सुन्दर अङ्ग भएकी हे देवी! हे प्यारी! [यो सहस्रदल कमलले] कुनै क्षणमा सेतो वर्ण, कुनै क्षणमा उत्तम हरियो वर्ण, कुनै क्षणमा विचित्र रूप धारण गर्दछ ।। ४ ।।

यस प्रकार हे देवी! त्यो पद्म जसरी गोलोक धाम शोभित छ त्यसरी नै नाना प्रकारले सधैँ शोभित छ। हे देवी! गोलोकका अधिपति तथा कैलासका अधिपतिले भक्तिभावपरायण हुँदै हरेक पत्रमा ध्यानयोगको अभ्यास गर्दछन् । यसैगरी सदैव दिव्य भावमा रहेका स्तुति एवं भक्तिपरायण ब्रह्मा आदि देवताहरू तथा इन्द्र आदि स्वर्गका देवताहरू [ध्यानयोगको अभ्यास गर्दछन्] ।। ५–७ ।।

हे महेश्वरी! हे प्यारी! त्यहाँ नै लाखौँ लाख मुरलीधर, त्यहाँ करोडौँ शिव तथा ब्रह्मा [रहन्छन्] । हे परमेश्वरी! प्रत्येक दिन धेरै ब्रह्माण्डहरू हुन्छन् । त्यसैभित्र ब्रह्माको स्थापना गर्नू, त्यहीँ नै विष्णु, त्यहीँ नै धेरै स्वरूपका शिवको स्थापना गर्नू । त्यसैगरी हे परमेश्वरी! विभिन्न शक्तिहरूलाई [त्यहाँ] स्थापना गर्नू ।। ८–१० ।।

हरेक ब्रह्माण्डभित्र ब्रह्मा आदि गरिएका तीन जना देवताहरूलाई विभिन्न शक्तिले युक्त गरेर ब्रह्माण्डको स्थापना गर्नू ।। ११ ।।

हे देवी! पृथिवी ब्रह्मपद्ममा त सबै मनुष्य आदि रहेका छन् । त्यसभित्र ब्रह्माण्डहरू, भुवनहरू पनि [रहेका छन्] ।। १२ ।।

त्यहाँ सप्त पाताल तथा त्यहाँ नै सप्त स्वर्ग, यही क्रमले देहमा चौध भुवनहरू [रहेका छन्] । हे परमेश्वरी! हरेक देह ब्रह्माण्ड हो, यसमा संशय छैन । बाहिरी देशको तथा ब्रह्माण्डको लक्षण बताइयो ।। १३–१४ ।।

हे देवी! जसभित्र साक्षात् चौध भुवनहरू रहेका छन्, त्यो नै महाब्रह्माण्डभित्र रहने विग्रह हो ।। १५ ।।

त्यसैगरी हे देवी! त्यहाँ ब्रह्माण्डरूपी पृथिवीमा धेरै प्रकारका [विग्रहहरू छन्] । बृहद् ब्रह्माण्डमा जे [छन्] ती सबै जन्म लिने शरीरीहरूका [देहमा पनि छन्] । जीवको स्वरूप लिएका तिनीहरू पृथिवीमा पनि छन् । महाब्रह्माण्डभित्र त बृहद् ब्रह्माण्ड रहन्छ ।। १६–१७ ।।

हे देवी! त्यसभित्र प्राणीहरू, त्यसभित्र भुवनहरू पनि [छन्] । सृष्टिमार्गले तथा स्थूल र सूक्ष्म आदिको भिन्नताले भेद छ ।। १८ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हे परमेश्वरी! महाब्रह्माण्डमा जे जे प्रकार छन्, ती ती सबै नै बृहद् ब्रह्माण्डभित्रबाट नै [आएका हुन्] ॥ १९ ॥

त्यो रूप तथा चौध भुवनहरू पनि देहभित्र [छन्] । ब्रह्माण्डको सृष्टिप्रकारमा निश्चय नै [कुनै] भेद छैन ॥ २० ॥

सुन्दर अङ्ग भएकी हे देवी! ठूलो तथा सानो नै भेदको परिचायक [हो] । पद्मभित्र बीजकोषमा चौध भुवनहरू [रहेका छन्] ॥ २१ ॥

त्यसभित्र सबै देवताहरूको आश्रयस्वरूप धेरै प्रकारको आकार भएको महारुद्रको कारणस्थान सत्यलोक [रहेको छ] ॥ २२ ॥

दश जना कान्ता (प्रिया) भएका स्वर्गमा रहेका चक्रपाणिले दिशा, जलमण्डल तथा पूर्णचन्द्रको मण्डल बनाएका हुन् ॥ २३ ॥

[त्यसको] चारैतिर पारिजातहरू [तथा] बिचमा फेरि कल्पद्रुम [रहेको छ] । कल्पवृक्षको नजिकमा उत्तम ज्योतिमण्डल [रहेको छ] ॥ २४ ॥

[उक्त ज्योतिमण्डल] उदाउँदो सूर्यको जस्तो तेज भएको, चारवटा द्वारले सिँगारिएको, मन्द मन्द हावाले युक्त भएको, गन्धधूपहरूले सिँगारिएको [छ] ॥ २५ ॥

हे देवी! हे प्यारी! त्यसको बिचमा वेदिका रूप रत्नसिंहासन [रहेको छ] । त्यस [वेदिका]को बिचमा आत्मालाई मायाले ढाकेकी परम महाकाली चनाको आकारको रूपले [रहेकी छिन्] । नाममात्रले भिन्न भएको त्यो आत्मा नै समान भागले महारुद्र, महाविष्णु र महाब्रह्मा [हो] । एउटै मूर्ति ब्रह्मा, विष्णु र महेश्वरको नामले [रहेका छन्] ॥ २६–२८ ॥

भिन्न भिन्न भावमा जसको मन [छ], त्यस्ताको मोक्ष हुँदैन । सुन्दर नयन भएकी हे देवी! त्यहाँ लाखौँ लाख ब्रह्माण्डहरू उत्पन्न हुन्छन् ॥ २९ ॥

त्यहाँ ब्रह्मा, विष्णु र रुद्रलाई राम्ररी न्यास गर्नू । यसप्रकार ब्रह्माण्डको निर्माण गरेर निर्गुण, सनातन विष्णु सजीव मूर्ति तथा प्राणीहरूको शरीर बनाएर यसप्रकार सधैँ विविध ब्रह्माण्डको सृजना गर्दछन् । [तिनी] नै निर्गुण, बिन्दुरूप, सिद्धिका कारण, एक, निरञ्जन, देव निश्चय नै कसैद्वारा विष्णु भनिन्छन्, केही [तिनलाई] ब्रह्मा, केही महारुद्र भन्दछन् । आद्याशक्तिले युक्त, चनाको आकारको रूप भएका देव इन्द्रजालको दियोको जस्तो प्रकाश भएका, चन्द्र, सूर्य र अग्नि रूप भएका, महान् ज्योतिस्वरूपका, निराकार तथा झल्झलाउँदो इन्द्रधनुषजस्ता [छन्] ॥ ३०–३४ ॥

सत्यलोकमा बीजकोषमा सुन्दर चिन्तामणिगृहमा रहेको रत्नसिंहासनको माथि निरञ्जन देवलाई ध्यान गर्नू ॥ ३५ ॥

त्यसभित्र पूजाध्यानपरायण आफ्ना गुरु जो कान्ताले सहित छन्, चाँदीको पर्वतजस्तै [सेतो वर्णका] छन्, [त्यस्ता] देवलाई [मानस] पूजा गर्नू ॥ ३६ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राम्रो मुख भएका, सुन्दर अनुहार भएका, सुन्दर प्रकाशस्वरूप भएका यस्ता कान्ताले युक्त देवलाई आफ्नो शरीरमा चिन्तन गर्नू ।। ३७ ।।

जसरी ऐनामा पर्वत देख्छन् त्यसरी [नै] सहस्रार महापद्ममा देवलाई चिन्तन गर्नू ।। ३८ ।।

हे प्रिये!, हे कल्याणी! यो निश्चय नै ब्रह्मालय हो, मोक्षालय हो, निर्गुणको आलय हो, साक्षात् महाकालीको आलय हो ।। ३९ ।।

त्यहाँ नै सधैँ नित्य, निराकार, निश्चल, जसको रूप परम आनन्द हो [त्यस्ता] परापर जगत्का पति तथा सधैँ आनन्दमा मग्न, काललाई पनि प्रकाशित गर्ने, आद्याशक्ति, महाकाली, देवताहरूलाई मुक्त गराउने, देवी काली रहन्छन् ।। ४०–४१ ।।

जसरी वृक्षहरू पृथिवीमा उत्पन्न हुन्छन्, पृथिवीमा [नै] बिलाउँछन्, जलबाट फोका उत्पन्न हुन्छ, जलमै बिलाउँछ, मेघमा बिजुली उत्पन्न हुन्छ, मेघमै लय पनि हुन्छ त्यसरी [नै] ब्रह्मा आदि देवताहरू कालिकाबाट उत्पन्न हुन्छन् तथा प्रलयकालमा तिनैमा लीन हुन्छन् । हे देवी! शक्तिविना मुक्तिको कल्पना हाँसो मात्र हो ।। ४२–४४ ।।

सुन्दर नयन भएकी हे देवी! कालिकाको एक अंशले ब्रह्मा, एक अंशले जनार्दन [तथा] एक अंशले शम्भु हुन्छन् ।। ४५ ।।

ती अपरा [जसभन्दा पर अरू कोही छैन] महाकाली नदीहरूका लागि समुद्रजस्तै [हुन्] । [ती कालिकाको सापेक्षमा] ब्रह्मा आदि देवताहरू गाईले कुल्चेको ठाउँमा बनेको सानो खाल्डोमा रहने थोरै परिमाणको जलजस्तै हुन् ।। ४६ ।।

हे कल्याणी! गाईले कुल्चेको ठाउँमा बनेको सानो खाल्डोले समुद्रको जललाई के जानोस् ? ती ब्रह्मा, विष्णु र शङ्करले पनि [कालिकालाई] जान्दैनन् ।। ४७ ।।

सृष्टि गर्नका लागि कालीबाट जसरी देवता आदिहरू बहिर तानिन्छन् त्यसरी नै प्रलयकालमा फेरि तिनैमा लीन गरिन्छ ।। ४८ ।।

त्यसैले काली निर्वाण प्रदान गर्नेवाली हुन् [भने] दक्षिण दिशामा बसेका सूर्यपुत्र [यम]स्वर्ग दिनेवाला हुन् ।। ४९ ।।

[संसारको भयदेखि] चारैतिरबाट डराएकाहरू कालीको नामले भाग्दछन् । त्यसपछि तिनी तीनै लोकहरूमा दक्षिणा नामले स्तुति गरिन्छिन् ।। ५० ।।

पुरुष दक्षिण भनिन्छन् भने वामा महामोक्ष प्रदान गर्ने शक्ति भनिन्छिन् । वामाले दक्षिणलाई जितेकाले तिनी तिनै लोकहरूमा दक्षिणा नामले स्तुति गरिन्छिन् । कालीद्वारा निर्गुण पुरुष सृजना गरिन्छ तथा फेरि [आफैँमा] लीन गरिन्छ ।। ५१–५२ ।।

त्यसैले तिनी तीनै लोकहरूमा दक्षिणा नामले स्तुति गरिन्छिन् । जो वैष्णवी महाविद्या जगदम्बिका कालिका

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

[हुन्] ती साकाररूप काली CC-0.In Public Domain. Digitization by eGangotri चनाको स्वरूपकी, हातखुट्टाले रहित, चन्द्र, सूर्य र अग्निस्वरूपकी छिन् ॥ ५३–५४ ॥

सदैव पापरहित हे देवी! सुन्दर मुख भएकी हे देवी! तिनैको स्थानलाई सत्यलोक भनिन्छ जुन स्थान सबै देवताको प्रार्थनीय [स्थान हो] । त्यो स्थानको माहात्म्य अहिले म के भनूँ ? सुन्दर आँखा भएकी हे देवी! सहस्रदल पद्मको एउटा पत्रमा हजारौँ गोलोक धाम [रहेको छ] त्यसैले हजारौँ जन्मले तथा करोडौँ जिभ्राले पनि [त्यस स्थानको माहात्म्य] बताउन सकिँदैन ॥ ५५–५७ ॥

हे पार्वती! [त्यस सहस्रदल पद्मको] एउटा पत्रको त्यो शोभा [पनि] बताउन सक्दिनँ त्यसैले सुन्दर नितम्ब भएकी हे देवी! तिमी [त्यसको माहात्म्य सुन्ने कुराबाट] विरत बन ॥ ५८ ॥

कमलको फूलमा जुन शोभा हुन्छ [त्यो] के मैले बताउन सक्छु र? हे देवी! त्यसको माझमा कर्णिका, कर्णिकाको माझमा बीजकोष, बीजकोषको माझमा एक लाख योजन विस्तारको अति सुन्दर उत्तम जलमण्डल अमृतसागर [रहेको छ] । हे कल्याणी! त्यस [जलमण्डल]को बिचमा हजार योजनको मणिद्वीप [रहेको छ] । [त्यस मणिद्वीपको] चारैतिर पारिजातहरू, कदम्बको उत्तम वन [रहेको छ] । [त्यस वनको] माझमा कल्पवृक्ष, त्यहाँ चारवटा ढोकाले युक्त, सुनको भित्ताले सिँगारिएको उत्तम ज्योतिस्वरूप मन्दिर [रहेको छ] [जुन] मन्द मन्द हावाले युक्त, सुगन्ध एवं फूलले युक्त [छ] । त्यहाँ पूजापरायण हजारौँ देवकन्याहरू छन् ॥ ५९–६३ ॥

हे महेश्वरी! त्यस [मन्दिर]को बिचमा पचास वर्णमातृकास्वरूप वेदिका [रहेको छ] । हे कल्याणी! त्यसको माथि सुनको सिंहासन [रहेको छ] ॥ ६४ ॥

[सुनको त्यस सिंहासनमा] महाकाली, चणकाकार महारुद्र, इन्द्रजालको दियोको जस्तो प्रकाश भएको सनातन महाज्योति [रहेका छन्] ॥ ६५ ॥

हे प्यारी! तिमीलाई क्रमैले सप्तस्वर्ग बताएँ । [यो कुरा] सुनेर यत्नपूर्वक गोप्य राख्नू, कुनै हालतमा पनि प्रकाशमा नल्याउनू । हे देवी! तिम्रो अति स्नेहले [यो] ठाउँमा प्रकाशित गरियो, मैले पनि सङ्क्षेपमा बताएँ, विस्तारमा [बताउन] सकिँदैन ॥ ६६–६७ ॥

चण्डिका र शङ्करको संवादस्वरूप निर्वाणतन्त्रमा सत्यलोककथन नामक दशौँ पटल पूरा भयो ॥ १० ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एकादशः पटलः

श्रीचण्डिकोवाच[१]
त्वत्प्रसादान्महादेव पवित्राहं न चान्यथा ।
इदानीं श्रोतुमिच्छामि तत्त्वज्ञानं सुदुर्लभम् ।। १ ।।
श्रीशङ्कर उवाच
तत्त्वे ज्ञानादिकथने शङ्कते[२] मम मानसम् ।
एतत् प्रसङ्गश्रवणे[३] विरता भव पार्वति[४] ।। २ ।।
येन ज्ञानप्रसादेन विष्णुः सत्त्वगुणाश्रयः ।
शृणु देवि प्रवक्ष्यामि ब्रह्मा लोकपितामहः ।। ३ ।।
तत्त्वज्ञानप्रसादेन शम्भुः संहारकारकः ।
अन्ये मुक्ताश्च ये सर्वे तेऽपि तत्त्वप्रसादतः ।। ४ ।।
तत्त्वज्ञानं परेशानि कथं वा कथ्यते मया ।
विरता भव देवेशि न हिं[५] पृच्छ पुनः पुनः ।। ५ ।।
इति तस्य वचः श्रुत्वा शाङ्करी[६] वाक्यमब्रवीत् ।
यदि तत्त्वं महादेव न मे कथयसि प्रभो[७] ।।
प्राणत्यागं करिष्यामि पुरतस्ते न संशयः ।। ६ ।।
श्रीशङ्कर उवाच
शृणु देवि प्रवक्ष्यामि तत्त्वं परमदुर्लभम् ।।
श्रुत्वा गोपय यत्नेन स्वयोनिरिव सुन्दरि ।। ७ ।।
मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च ।
पञ्चतत्त्वमिदं देवि निर्वाणमुक्तिहेतवे ।। ८ ।।
अष्टैश्वर्य परं मोक्षं मद्यपानेन शैलजे ।
मांसभक्षणमात्रेण साक्षान्नारायणो भवेत् ।। ९ ।।
मत्स्यभक्षणमात्रेण[८] कालीप्रत्यक्षता भवेत् ।
मुद्राभक्षणमात्रेण[९] भूपूज्यो विष्णुरूपधृक् ।। १० ।।

---

१ श्रीचण्डिका उवाच –ज
२ तत्त्वज्ञानादिकथने न शक्यं –च, ज
३ प्रशंसाश्रवणे –च, ज
४ सुन्दरि –च, ज
५ वै –च, ज
६ शङ्करी –च, ज
७ विभो –च, ज
८ मांसभक्षणमात्रेण –च, ज
९ मांसभक्षणमात्रेण –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

मैथुनेन महायोगी मम तुल्यो न संशयः ।
CC-0.In Public Domain. Digitization by eGangotri
तन्त्रान्तरे तु[१०] देवेशि मयैव कथितं पुरा ।। ११ ।।
माहात्म्यं चास्य धर्मस्य पुरैव कथितं मया ।
तत्त्वज्ञानमिदं कान्ते निर्वाणमुक्तिकारणम् ।। १२ ।।
एकत्र पञ्चतत्त्वानां[११] यत्रैव मिलनं[१२] भवेत् ।
तत्रैवाहं प्रगच्छामि ते नरा मत्समाः सदा ।।१३ ।।[१३]
सा नारी कालिकारूपा मृते तस्यां प्रलीयते ।
ये नराः साधुरूपाश्च तत्त्वज्ञानपरायणाः ।। १४ ।।
जीवन्मुक्ताश्च ते प्रोक्ता ब्रह्मरूपा न चान्यथा ।
सायुज्यादिमहामोक्षं नियुक्तं क्षत्रियादिषु ।। १५ ।।
ब्राह्मणः परमेशानि यदि तत्त्वपरायणः ।
सत्यं सत्यं पुनः सत्यं परे तत्त्वे प्रलीयते ।। १६ ।।
यथा तोयं तोयमध्ये लीयते परमेश्वरि ।
तथैव तत्त्वसेवायां लीयते परमात्मनि ।। १७ ।।
इति ते कथितं कान्ते तत्त्वज्ञानं विमोक्षदम्[१४] ।
येन विज्ञानमात्रेण मोक्षसिद्धिर्न संशयः ।। १८ ।।
क्षितिं विना यथा नास्ति संस्थितेः कारणं सदा ।
तोयं विना यथा नास्ति पिपासानाशकारणम् ।। १९ ।।
तमोहन्ता यथा नास्ति भास्करेण विना प्रिये ।
विना वह्निप्रयोगेण यथा किञ्चिन्न पच्यते[१५] ।। २० ।।
विना चन्द्रेण[१६] देवेशि सुधावृष्टिर्न जायते ।
मातृगर्भं विना कान्ते ह्युत्पत्तिर्न[१७] यथा भवेत् ।। २१ ।।
तत्त्वज्ञानं विना देवि तथा मुक्तिर्न जायते ।
अत एव महेशानि गोपनं कुरु यत्नतः ।। २२ ।।
दिव्यभावयुतानां च तत्त्वज्ञानं सदा भवेत् ।
वीरभावयुतानां वै तत्त्वं सेव्यं सदानघे ।। २३ ।।
न पशोरालये कुर्यान्न पशोर्ज्ञानगोचरे ।

---

१० तन्त्रान्तरेऽपि -ङ
११ पञ्चतत्त्वानि –क, ख, ग । पञ्चतत्त्वं तु –च, ज
१२ मिलितं –च, ज
१३ तत्रैव तु प्रगच्छन्ति नरा मत्सदृशाः सदा –च, ज
१४ हि मोक्षदम् –च, ज
१५ पश्यते –च, ज
१६ तन्त्रेण –च, ज
१७ उत्पत्तिर्न –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

न पशोः सन्निधाने च न पशोर्दृष्टिगोचरे ।। २४ ।।[१८]
अन्यथापक्षीकीटस्य दर्शनं नैव[१९] कारयेत् ।
सिद्धेर्वर्त्म श्रृणु प्राज्ञे यत् कृत्वा सिद्धिमाप्नुयात् ।। २५ ।।
एकां शक्तिं समानीय एकैवः साधकः सदा ।
पूजयेद् बहुयत्नेन पञ्चतत्त्वेन कौलिकः ।। २६ ।।
एवं कृत्वा लभेत् सिद्धिं नान्यस्य दृष्टिगोचरे ।
श्रीचक्रपूजा यत्रैव तत्रैव धनसिद्धये[२०] ।। २७ ।।
सिद्धिर्न जायते तत्र कदाचिदन्यसन्निधौ ।
तत्रैव कामनासिद्धिर्यत्र चक्रं प्रपूजयेत् ।। २८ ।।
आयुरारोग्यमैश्वर्यं श्रीचक्रपूजनाद् भवेत्[२१] ।
कीर्तिवृद्धिर्यशोवृद्धिर्मुक्तिभागी न संशयः ।। २९ ।।
वाञ्छासिद्धिर्ज्ञानसिद्धिर्देव्याः प्रीतिश्च जायते ।
श्रीचक्रपूजां यः कुर्यात् स एव शम्भुरव्ययः ।। ३० ।।
अश्वमेधसहस्राणि वाजपेयशतानि च ।
इष्ट्वा यत् फलमाप्नोति तत्फलं कौलिकार्चने ।। ३१ ।।
वापीकूपतडागादि दत्त्वा यत् फलमाप्नुयात् ।
तत्फलात् कोटिगुणितं यदि चक्रं प्रपूजयेत् ।। ३२ ।।
तदन्नं मेरुतुल्यं स्याद् बिन्दुः सिन्धुसमोपमं ।
पुष्पं च मेरुसदृशं यदि चक्रं प्रपूजयेत् ।। ३३ ।।[२२]
तन्मध्ये वर्तते देवि यदि व्याधियुतो नरः ।
शिवबुद्ध्या[२३] प्रपूज्यो हि भ्रान्तिं तत्र विवर्जयेत् ।। ३४ ।।
सूर्यस्य प्रतिबिम्बं यत् तत् तोये[२४] परिपश्यति ।
गङ्गातोये यथा सूर्यो हीनतोये तथा पुनः ।। ३५ ।।
सूर्यस्य दूषणं नास्ति सूर्यैकः परितिष्ठति ।
तथैव परमेशानि साधके नास्ति दूषणम् ।। ३६ ।।
मन्त्राराधनमात्रेण[२५] तदात्मा तन्मयो[२६] भवेत् ।
अत एव महेशानि दूषणं नास्ति रेतसि ।। ३७ ।।

१८ यो पाठ मातृका च र जमा छैन ।
१९ नहि –च, ज
२० ध्यानसिद्धये –च, ज
२१ श्रीचक्रपूजनाल्लभेत् –च, ज
२२ यो पाठ मातृका ङ, च र जमा छैन ।
२३ शिवब्रह्मा –च, ज
२४ तोयं –च, ज
२५ मन्त्रधारणमात्रेण –च, ज
२६ शोभनो –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

रेतः पवित्रं परमं शक्तिर्मोक्षस्य कारणम् ।
CC-0.In Public Domain. Digitization by eGangotri
पूजाहीना च या शक्तिर्जपहीना च या पुनः ।। ३८ ।।
धृत्वा साधकरेतश्च सा नारी कालिका स्वयम् ।
भ्रान्तिरत्र न कर्तव्या यदि मुक्तिं प्रयच्छति ।। ३९ ।।
या नारी भ्रान्तिसंयुक्ता आगता चक्रमण्डले ।
सप्तजन्मनि सा नारी चाण्डाली पतिवर्जिता ।। ४० ।।
एवंरूपां च[२७] यां नारीमवज्ञां कुरुते यदि ।
धनपुत्रैर्वर्जितश्च स चाण्डालो न चान्यथा ।। ४१ ।।
इति ते कथितं कान्ते तत्त्वज्ञानं विमोक्षदम् ।
येषां देहे महेशानि तत्त्वज्ञानं मयोदितम् ।। ४२ ।।
ते पुनर्जननीगर्भे न विशन्ति कदाचन ।
जीवन्मुक्ताश्च ते प्रोक्ताः शिवरूपाश्च ते नराः ।। ४३ ।।
श्रृणु देवि प्रवक्ष्यामि कौलिकस्य च लक्षणम् ।
यस्मिन् देवे यदाचारो[२८] निर्दिष्ट्ये मन्त्रसाधने ।। ४४ ।।
तदाचारो[२९] विशिष्ट्ये यः कौलिकश्चैव[३०] कीर्तितः ।
शैवे शाक्ते गाणपत्ये[३१] सौरे चान्द्रे सुलोचने ।।
तत्त्वज्ञानमिदं प्रोक्तं वैष्णवे श्रृणु यत्नतः ।। ४५ ।।

इति निर्वाणतन्त्रे तत्त्वविवरणं नाम एकादशः पटलः ।।[३२]

---

२७ विरूपां –ङ, च, ज

२८ देशे तु यद् द्वारो –च, ज

२९ तद्द्वारेण –च, ज

३० कौलिकः स च –च, ज

३१ च गाणेशे –च, ज

३२ इति निर्वाणतन्त्रे तत्त्वज्ञानविवरणं नाम एकादशः पटलः -घ ।। इति निर्वाणतन्त्रे देवीश्वरसंवादे तत्त्वविवरणं नाम एकादशः पटलः –ङ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एघारौँ पटल

[नेपाली भाषानुवाद]

श्रीचण्डिकाजी भन्नुहुन्छ–

हे महादेव! म तपाईँको कृपाले पवित्र छु, नत्र भने हुने थिइनँ। अब अति दुर्लभ तत्त्वज्ञान सुन्न चाहन्छु ।। १ ।।

श्रीशङ्करजी भन्नुहुन्छ–

हे पार्वती! तत्त्वज्ञान आदि भन्नमा मेरो मन शङ्का गर्छ। यो प्रसङ्ग सुन्नमा मन नलगाऊ ।। २ ।।

हे देवी! म भन्नेछु, [तिमी] सुन– जुन ज्ञानरूपी प्रसादले, तत्त्वज्ञानरूपी प्रसादले सत्त्वगुणका आश्रय विष्णु, तिनै लोकका पितामह ब्रह्मा, संहारकारक शम्भु, अरू पनि जो [छन्] ती सबै तत्त्व [ज्ञानको] प्रसादबाट मुक्त भएका [छन्], हे परमेश्वरी! [त्यो] तत्त्वज्ञान मैले कसरी बताऊँ? [त्यसैले] हे देवी! वारंवार नसोध, [त्यसप्रति] विरत बन ।। ३–५ ।।

तिनको यस्तो कुरा सुनेर शाङ्करीले भनिन्– "हे महादेव! हे प्रभु! यदि मलाई तत्त्व बताउनु हुन्न भने तपाईँको अगाडि प्राणत्याग गर्नेछु, यसमा कुनै शङ्का छैन" ।। ६ ।।

श्रीशङ्करजी भन्नुहुन्छ–

हे देवी! परम दुर्लभ तत्त्व भन्नेछु, सुन। हे सुन्दरी! [तत्त्व कुरा] सुनेर यत्नपूर्वक आफ्नो योनिलाई भैँ गोप्य राख ।। ७ ।।

हे देवी! मद्य, मांस, मत्स्य, मुद्रा र मैथुन– यी पाँच तत्त्व निर्वाणस्वरूप मुक्तिका लागि हुन् ।। ८ ।।

हे पार्वती! मद्यपानले आठ ऐश्वर्य तथा परम मोक्ष [प्राप्ति हुन्छ]। मांसभक्षणमात्रले साक्षात् नारायण हुन्छ। मत्स्यभक्षणमात्रले कालीको साक्षात्कार हुन्छ। मुद्राभक्षणमात्रले पृथिवीमा पूज्य [हुन्छ], विष्णुको रूप धारण गर्ने [हुन्छ]। मैथुनले मजस्तै महायोगी [हुन्छ, यसमा] शङ्का छैन। हे देवी! अरू तन्त्रमा त मैले नै [यो कुरा] भनेको छु ।। ९–११ ।।

विवरणः

यहाँ कुलाचारसम्मत पञ्चतत्त्वसेवनको प्रसङ्ग आएको छ। मद्यलाई भैरवरूप मानिएको छ। स्वयं भैरवले आफूलाई द्रवरूपमा मद्य बनाएको कथन पाइन्छ–

सुरा च परमा शक्तिर्मद्य भैरव उच्यते।

आत्मा कृतो द्रवरूपो भैरवेण महात्मना ।। (तन्त्रालोक, २९।११–१३, विवेकव्याख्या, पृ. २८२)। त्यसैले मद्यलाई शुद्ध, प्रकाशानन्द, चिन्मय भैरवस्वरूप सम्झेर सेवन गर्ने निर्देश पाइन्छ–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

एतत् स्वयं रसः शुद्धः प्रकाशानन्द चिन्मयः ।
CC-0. Public Domain. Digitization by eGangotri

देवतानां प्रियं नित्यं तस्मादेतत् पिबेत् सदा ।। (तन्त्रालोक, २९।१३) ।

पञ्चतत्त्वसम्बन्धी थप चर्चा यसै ग्रन्थको उपोद्धातमा गरिएको छ ।

हे प्यारी! यस धर्मको माहात्म्य र निर्वाणस्वरूप स्वरूप मुक्तिको कारण यो तत्त्वज्ञान मैले पहिले नै भनेको छु ।। १२ ।।

पाँचवटा तत्त्वहरूको जहाँ नै एकत्र मिलन हुन्छ त्यहाँ नै म जान्छु, ती पुरुषहरू सधैँ मसमान हुन्, ती नारी कालिकाका रूप हुन्, मरे छँदामा तिनैमा लीन हुन्छिन् । जो साधुरूप, तत्त्वज्ञानपरायण मानिसहरू छन् ती ब्रह्मरूप, जीवन्मुक्त भनिएका छन्, अरूथोक होइन । सायुज्यरूप महामोक्ष क्षत्रियहरूमा विनियोग भएको छ ।। १३–१५ ।।

हे परमेश्वरी! ब्राह्मण यदि तत्त्वपरायण [छ भने] परम तत्त्वमा लय हुन्छ, यो साँचो हो, साँचो हो, फरि पनि साँचो हो । हे परमेश्वरी! जसरी जल जलमा लय हुन्छ, त्यसैगरी तत्त्वसेवा गरे छँदामा [साधक] परमात्मामा लीन हुन्छ ।। १६–१७ ।।

हे प्यारी! मोक्ष प्रदान गर्ने यो तत्त्वज्ञान तिमीलाई बताइयो जुन ज्ञानको प्रसादले मोक्षसिद्धि हुन्छ । [यसमा] संशय छैन ।। १८ ।।

पृथिवीबाहेक जसरी स्थितिको कारण छैन, पानीबाहेक जसरी प्यास मेटाउने अर्को कारण छैन, सूर्यबाहेक जसरी अँध्यारो हटाउने अर्को छैन, आगो प्रयोग नगरीकन जसरी केही पाक्तैन, चन्द्रमाविना जसरी सुधावृष्टि हुँदैन, आमाको गर्भविना जसरी जन्म हुँदैन त्यसैगरी तत्त्वज्ञानविना मुक्ति हुँदैन त्यसकारण हे महेश्वरी! यत्नपूर्वक [तत्त्वज्ञानलाई] गोप्य राख ।। १९–२२ ।।

दिव्यभावले युक्त भएकालाई सधैँ तत्त्वज्ञान हुन्छ । हे निर्मल चित्त भएकी देवी! वीरभावले युक्त भएकाहरूले निश्चय नै सधैँ [पञ्च]तत्त्वको सेवन गर्नू ।। २३ ।।

पशु [पशुभावले युक्त]को घरमा, पशुको ज्ञानेन्द्रियले थाहा पाए छँदामा, पशुको नजिकमा, पशुको आँखाले देखे छँदामा, पक्षी, कीराफट्याङ्ग्रालाई प्रतिकूल अवस्थामा देखे छँदामा [पञ्चतत्त्वको सेवन] नगर्नू । हे ज्ञानी! जे गर्नाले सिद्ध प्राप्त हुन्छ [त्यो]सिद्धिको बाटे सुन । २४–२५ ।।

एउटी शक्ति [साधनाका लागि सहायिका स्त्री] ल्याएर सधैँ नै कौलिक साधकले पञ्चतत्त्वले यत्नपूर्वक पूजा गरोस् ।। २६ ।।

विवरण :

कुलाचारसम्मत शाक्तोपासनामा साधनाका लागि सहायिका स्त्री अथवा बाह्य शक्तिलाई दूती भनिन्छ । जसरी वैदिक यज्ञमा सपत्नीक पूजाको विधान छ त्यसरी नै कुलाचारमा कुलसाधकले दूतीका साथमा रहेर कुलयाग सम्पन्न गर्नुपर्छ । त्यसैले भनिएको छ–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ब्राह्मणस्य यथा पत्नी तया सह यजेन्मखे ।

एवं दूतिः कुलाचार्ये ज्ञेया नित्योदिते कुले ।। (तन्त्रालोक, २९।९६, विवेकव्याख्या, पृ. ३३१) ।

कुलसाधक र दूतीका साथ परस्पर शिवशक्त्यात्मक भाव हुनुपर्छ । दूतीका साथ राग, मोह आदिले युक्त मानवी बुद्धि राख्नु हुँदैन । त्यसैले भनिएको छ–

शिवशक्त्यात्मकं रूपं भावयेच्च परस्परम् ।

न कुर्यान्मानवीं बुद्धिं रागमोहादिसंयुताम् ।। (तन्त्रालोक, २९।१०१–१०२, विवेकव्याख्या, पृ. ३४१) ।

यसो गर्नाले सिद्धि प्राप्त गर्दछ, [यसो] नगर्ने अर्कोको सिद्धि दृष्टिगोचर हुँदैन । धनसिद्धिका लागि जहाँ श्रीचक्रको पूजा [हुन्छ] त्यहाँ नै [सिद्धि हुन्छ] । अरूको सन्निधिमा त्यहाँ कहिल्यै पनि सिद्धि हुँदैन । जहाँ [श्री] चक्रको पूजा हुन्छ त्यहाँ नै कामनासिद्धि [हुन्छ] ।। २७–२८ ।।

श्रीचक्रको पूजनबाट साधकको आयु, आरोग्य, ऐश्वर्य, कीर्ति र यशको वृद्धि हुन्छ, [ऊ] मुक्तिभागी हुन्छ, [यसमा] कुनै संशय छैन । कामनासिद्धि, ज्ञानसिद्धि र देवीको प्रीति पनि हुन्छ । जसले श्रीचक्रको पूजा गर्दछ त्यो शम्भु नै [हो], अव्यय [तत्त्व नै] हो ।। २९–३० ।।

यदि श्रीचक्रको पूजा गर्‍यो भने एक हजार अश्वमेध, एक सय वाजपेय यज्ञ गर्दा जुन फल पाउँछ त्यो फलभन्दा करोड गुना [बढी फल पाउँछ] ।। ३१–३२ ।।

यदि श्रीचक्रको पूजा गर्‍यो भने त्यो अन्न मेरुतुल्य हुन्छ, बिन्दु सिन्धुसमान [हुन्छ], फूल मेरुतुल्य [हुन्छ] । हे देवी! त्यसको माझमा यदि व्याधिले युक्त मान्छे छ भने [त्यो] शिवबुद्धिले निश्चय नै पूज्य हुन्छ, त्यहाँ भ्रान्ति नराख्नू ।। ३३–३४ ।।

सूर्यको जुन प्रतिबिम्ब हो, त्यो जलमा देखिन्छ । जसरी सूर्य गङ्गाको जलमा प्रतिबिम्बित हुन्छ त्यसरी नै हीन जलमा [पनि प्रतिबिम्बित हुन्छ] । [हीन जलमा प्रतिबिम्बित हुनुमा] सूर्यको दोष छैन, सूर्य [सधैँ] एकै रहन्छ । त्यसैगरी हे परमेश्वरी! साधकमा [कुनै] दोष छैन ।। ३५–३६ ।।

मन्त्रको आराधना मात्रैले त्यो जीव [शिवमा] तन्मय बन्दछ त्यसैले नै हे महेश्वरी! वीर्यमा दोष छैन । रेत परम पवित्र [छ], शक्ति [नारी]मोक्षको कारण [हो] । पूजाले हीन र फेरि जपले हीन जो शक्ति [नारी] हो, त्यो साधकको वीर्य धारण गरेर स्वयं कालिका [हुन्छिन्] । यदि सम्यक् मुक्ति चाहन्छ भने यसमा भ्रम नराख्नू ।। ३७–३९ ।।

जो नारी भ्रान्तिले युक्त भएर चक्रमण्डलमा आएकी छिन्, ती नारी सात जन्ममा चाण्डाली तथा पतिवर्जिता [हुन्छिन्] । [चक्रमण्डलमा आएकी] जो नारीलाई अवज्ञा गर्छ [त्यो पुरुष] अरूथोक होइन [बरु] धन तथा पुत्र [आदि]ले वर्जित हुन्छ तथा चाण्डाल हुन्छ ।। ४०–४१ ।।

हे प्यारी! मोक्ष प्रदान गर्ने तत्त्वज्ञान तिमीलाई बताएँ । हे महेश्वरी! मैले बताएको तत्त्वज्ञान जसको देहमा रहन्छ, तिनीहरू फेरि कहिल्यै पनि माताको गर्भमा प्रवेश गर्दैनन्, ती मानिसहरू जीवन्मुक्त तथा शिवरूप

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

हुन् ॥ ४२–४३ ॥

CC-0.In Public Domain. Digitization by eGangotri

हे देवी! कौलिकको लक्षण बताउँछु, सुन– शैव, शाक्त, गाणपत्य, वैष्णव, सौर, चान्द्र [परम्परा]मा जुन देवतामा, जुन मन्त्रसाधनामा जुन आचार निर्दिष्ट छ त्यो आचार विशिष्ट हुन्छ जुन कौलिक नै भनिएको छ। यो तत्त्वज्ञान भनियो, यत्नपूर्वक सुन ॥ ४४–४५ ॥

निर्वाणतन्त्रमा तत्त्वविवरण नामक एघारौँ पटल पूरा भयो ॥ ११ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

द्वादशः पटलः

श्रीचण्डिकोवाच[१]

श्रृणु नाथ परानन्द मम प्राणेश्वर प्रभो ।
वैष्णवस्य यथा तत्त्वं तन्मे[२] ब्रूहि जगत्पते ।। १ ।।

श्रीशङ्कर उवाच[३]

श्रृणु तत्त्वं वरारोहे वैष्णवस्य त्रिलोचने ।
गुरुतत्त्वं मन्त्रतत्त्वं वर्णतत्त्वं सुरेश्वरि ।। २ ।।
देवतत्त्वं ध्यानतत्त्वं पञ्चतत्त्वं वरानने ।
तत्रादौ श्रीगुरोस्तत्त्वं स्नेहाद् वक्ष्यामि पार्वति ।। ३ ।।
सतैलं वर्तिकायुक्तं देहस्थं ब्रह्मतेजसम्[४] ।
गुरुणा मन्त्रदानेन तत् सूत्रं दीपितं भवेत् ।। ४ ।।
देवतायाः शरीरं हि बीजादुत्पद्यते ध्रुवम् ।
अत एव हि तस्यात्मा देवरूपो न संशयः ।। ५ ।।
ईश्वरस्य तु यद् बीजं[५] तदेव अक्षरात्मकम् ।
तेन वर्णात्मकं देहं जन्तोरेव न संशयः ।। ६ ।।
मन्त्रवर्णे सवर्णानि[६] लीयन्ते परमेश्वरि ।
वर्णतत्त्वमिदं देवि मम सर्वं स्वयं भवेत् ।। ७ ।।
स्वयं देवो न चान्योऽस्मि[७] निर्मलो देवरूपकः ।
सर्वत्र देवतां ध्यायेत् तृणगुल्मलतादिषु ।। ८ ।।
ध्यानेन लभते सर्वं ध्यानेन विष्णुरूपकः[८] ।
ध्यानेन सिद्धिमाप्नोति विना ध्यानं न सिध्यति ।। ९ ।।
इति ते कथितं देवि[९] वैष्णवस्य सुरेश्वरि ।
यज्ज्ञानादमरत्वं[१०] च विष्णुरूपो न संशयः[११] ।। १० ।।

---

१ श्रीचण्डिका उवाच –ज
२ तन्त्रे –च, ज
३ श्रीशिव उवाच –च, ज
४ देहस्थब्रह्मतेजसम् –च, ज
५ तद्वीर्यं –च, ज
६ च ते वर्णा –च, ज
७ चान्यस्मिन् –च, ज
८ विष्णुरूपकम् –च, ज
९ कान्ते –च, ज
१० यज्ज्ञानादमृतत्वं –च, ज
११ भवेन्नरः –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

य: कुर्यात् परमेशानि तत्त्वज्ञानं मयोदितम् ।
CC-0.In Public Domain. Digitization by eGangotri
स्वर्गभागी भवेन्मर्त्यो विष्णुलोके महीयते[१२] ।। ११ ।।
यदि[१३] भक्तियुतो मर्त्यो मनसा चिन्तयेत् सदा[१४] ।
ते नरा नहि गच्छन्ति कदाचिद्यममन्दिरम्[१५] ।। १२ ।।
इति ते कथितं तत्त्वं वैष्णवस्य सुरेश्वरि ।
यज्ज्ञानादमरत्वं च लभते नात्र संशय: ।। १३ ।।

इति श्रीनिर्वाणतन्त्रे विष्णोस्तत्त्वकथनं नाम द्वादश: पटल: ।।

१२ वसेत् सदा –ङ, छ, ज
१३ शक्तियुतो –ङ । इति –च, ज
१४ यदि चिन्तयेत् –ख, ग
१५ मन्दिरे –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

बाह्रौँ पटल

[नेपाली भाषानुवाद]

श्रीचण्डिकाजी भन्नुहुन्छ–

हे प्रभु! हे मेरा प्राणेश्वर! हे परानन्द! हे नाथ! सुन्नुहोस् त, हे जगत्पति! वैष्णवको यथार्थ [तत्त्व के हो?] त्यो मलाई बताउनुहोस् ।। १ ।।

श्रीशङ्करजी भन्नुहुन्छ–

सुन्दर नितम्ब भएकी हे देवी! तीनवटा आँखा भएकी हे देवी! हे सुरेश्वरी! वैष्णवको [यथार्थ] तत्त्व गुरुतत्त्व, मन्त्रतत्त्व, वर्णतत्त्व, देवतत्त्व र ध्यानतत्त्व– यी पाँच तत्त्व सुन । हे पार्वती! तिम्रो स्नेहले त्यहाँ पहिले गुरुतत्त्वलाई बताउनेछु ।। २–३ ।।

देहमा रहेको ब्रह्मतेज [जुन] तेलले सहित भएको बत्तीले युक्त धागो [जस्तै] हो त्यो गुरुद्वारा दिइएको मन्त्रदानले प्रदीप्त बनोस् ।। ४ ।।

देवताको शरीर निश्चय नै बीजबाट उत्पन्न हुन्छ । त्यसैले नै देवताको आत्मा देवरूप हुन्छ, यसमा संशय छैन ।। ५ ।।

ईश्वरको जुन बीज हो त्यो अक्षारस्वरूप नै छ त्यसैले प्राणीहरूको शरीर वर्णस्वरूप नै छ, यसमा सन्देह छैन ।। ६ ।।

हे परमेश्वरी! वर्णहरू मन्त्रवर्णमा लीन हुन्छन् । हे देवी! यो सबै वर्णतत्त्व मेरो [हो], [यो] स्वयं हुन्छ ।। ७ ।।

[म] स्वयं निर्मल देहस्वरूप देव हुँ अर्को कोही होइन, घाँस, पात, लहरा आदिमा सर्वत्र देवताको ध्यान गर्नू । ध्यानले सबै पाइन्छ, ध्यानले [नै] विष्णुरूप [बनिन्छ], ध्यानले सिद्धि प्राप्त हुन्छ, ध्यानविना [केही पनि] सिद्ध हुँदैन ।। ८–९ ।।

हे देवी! हे सुरेश्वरी! वैष्णवको [तत्त्व कुरा] तिमीलाई भनियो जुन कुरा जान्नाले [साधक] विष्णुरूप हुन्छ, अमरत्व [प्राप्त हुन्छ, यसमा] संशय छैन । हे महेश्वरी! मैले भनेको तत्त्वज्ञानलाई जसले [व्यवहारमा लागू] गर्छ [त्यो] मानिस स्वर्गभागी हुन्छ, विष्णुलोकमा जान्छ । मनले सधैँ चिन्तन गर्दै मानिस यदि मुक्ति [प्राप्त गर्छ भने] ती मानिसहरू कहिल्यै पनि यमराजको लोकमा जाँदैनन् । हे सुरेश्वरी! वैष्णवको [तत्त्व कुरा] तिमीलाई भनियो जुन कुरा जान्नाले [साधक] विष्णुरूप हुन्छ, अमरत्व [प्राप्त हुन्छ, यसमा] संशय छैन ।। १०–१३ ।।

निर्वाणतन्त्रमा विष्णुको तत्त्वकथन नामक बाह्रौँ पटल पूरा भयो ।। १२ ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

त्रयोदशः पटलः

श्रीचण्डिकोवाच[१]
सृष्ट्यात्मकं दशार्णं च पुरैव[२] कथितं तु मे ।
प्रकाशरूपं तन्मन्त्रं कथयस्व दयानिधे ।। १ ।।
श्रीशङ्कर उवाच[३]
शृणु देवि प्रवक्ष्यामि मन्त्रं दशाक्षरं परम् ।
यस्य श्रवणमात्रेण मूढोऽपि विष्णुरूपकः[४] ।। २ ।।
पुंमन्त्रोऽपि च[५] देवेशि शक्तिमन्त्रं जपेद् यदि ।
अज्ञात्वा तन्महामन्त्रं स भवेद् ब्रह्मराक्षसः ।। ३ ।।
अज्ञात्वा तन्महामन्त्रं तत्त्वज्ञानी भवेद् यदि ।
तथापि नरकं गच्छेदिति देवस्य सम्मतम् ।। ४ ।।
शृणु देवि प्रवक्ष्यामि दशार्णं मन्त्रमुत्तमम् ।
मायाबीजं वधूबीजं[६] लक्ष्मीः काली च पाशकम् ।। ५ ।।
गगनं पक्षीबीजं च वह्निकान्ता[७] ततः प्रिये ।
इति ते कथितं चण्डि दशाक्षरमनुत्तमम् ।। ६ ।।
यज्ज्ञानादमरत्वं च लभते नात्र संशयः ।
अस्य ग्रहणमात्रेण नरो नारायणो भवेत् ।। ७ ।।
अस्य प्रसादमात्रेण चण्डि[८] निर्वाणतां व्रजेत् ।
दण्डोपरि जपेदेतत् दशार्णं परमेश्वरि ।। ८ ।।
अस्मान्मन्त्रान्महामन्त्रा जायन्ते नात्र संशयः[९] ।
सर्वे देवाः सदाराश्च दशार्णाज्जायते ध्रुवम् ।। ९ ।।
महाविद्योपासकश्च दशार्णं न हि पश्यति ।
इहलोके दरिद्रश्च परे च ब्रह्मराक्षसः ।। १० ।।
तस्माद् यत्नेन देवेशि दशार्णं श्रावयेद् गुरुः ।
केवलं श्रवणं कुर्यान्न जपेत् साधकोत्तमः ।। ११ ।।

---

१ श्रीचण्डिका उवाच –ज
२ पूर्वैव -घ
३ चण्डिकोवाच -क । श्रीशिव उवाच –च, ज
४ विष्णुरूपधृक् –च, ज
५ पुंमन्त्रो यदि –च, ज
६ लिपिकरको त्रुटिका कारण मातृका कमा यो पाठ लेख्न छुटेको छ ।
७ वह्निकान्तां –च, ज
८ अस्य प्रसादेन दण्डी सद्यो –च, ज
९ न कदाचन –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

यः श्रावयेद् दशार्णं च स नरो गुरुरुत्तमः ।
मन्त्रदाता यथा देवि तथैव सद्गुरुः[१०] स्मृतः ।। १२ ।।
दशार्णदाता यो देवि स एव परमो गुरुः ।
यथामरतरङ्गिण्यो[११] न समाः सकलापगाः ।। १३ ।।[१२]
दशार्णस्य समो नास्ति मन्त्रोऽपि सुरपूजिते ।
त्वत्समा यदि नारी च मत्समः पुरुषोऽस्ति च ।। १४ ।।[१३]
दशार्णस्य समो नास्ति मन्त्रो हि कथ्यते मया ।[१४]
दशकान्तस्य स्वर्णस्य सदृशं लौहमस्ति चेत् ।। १५ ।।[१५]
दशार्णस्य समं मन्त्रं कथयेयुस्तदा प्रिये ।
श्रीप्रासादी[१६] ह्ययं[१७] मन्त्रो दशार्णः परमेश्वरि ।। १६ ।।
ऊर्ध्वाम्नाये महातन्त्रे[१८] माहात्म्यं कथयामि ते ।[१९]
अतः परं प्रवक्ष्यामि यद्रूपं दण्डधारिणम्[२०] ।। १७ ।।
साधुरूपो गृहस्थश्च ब्राह्मणा ब्रह्मवादिनः ।
सर्वोपायपरित्यक्तः[२१] सदा धर्मपरायणः ।। १८ ।।
जितेन्द्रियो जितक्रोधः समत्वं सर्वजातिषु ।
पुत्रे रिपौ समत्वं च समं स्वर्णे[२२] च पार्थिवे ।। १९ ।।
दयाभावश्च सर्वत्र पुत्रे मित्रे रिपौ भवेत् ।
लाभालाभे जये नाशे निन्दाया[२३] पौष्टिके तथा ।। २० ।।
काये[२४] प्राणे न सम्बन्धो मृत्युमारभ्य युगान्तिके[२५] ।
ब्रह्मज्ञानं विना ज्ञानं यस्य चित्ते न विद्यते ।। २१ ।।
सन्न्यासधर्मस्तस्यैव नान्यस्य सुरपूजिते ।

---

१० स गुरुः –च, ज
११ यथैव च तरङ्गिण्या –च, ज
१२ केवलं श्रवणं देखि सकलापगाः सम्मको पाठ मातृका 'ङ'मा छैन ।
१३ मत्समा यदि नारी च त्वत्समः पुरुषोऽस्ति चेत् -ङ
१४ दशार्णस्य समं मन्त्रं कथयामि वरानने –च, ज
१५ दशकार्णस्य स्वर्गस्य सदृशं मोहमस्ति च–च, ज
१६ श्रीप्रासादो -ङ
१७ श्रीप्रसादः अयं –च, ज
१८ महामन्त्रे -ङ
१९ ऊर्ध्वाम्नायमहातन्त्रे कथयामि वरानने –च, ज
२० दण्डधारकम् –ग, घ
२१ सर्वमायापरित्यक्तः –ङ, च, ज
२२ स्वर्गे –च, ज
२३ निशायां -ङ
२४ काले -घ
२५ सर्वदा समभावुकः –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

सन्यासधारणं कार्यं विप्रस्य मुक्तिहेतवे ॥ २२ ॥
CC-0. In Public Domain. Digitization by eGangotri
यो विप्रो धारयेद् दण्डं सैव नारायणः स्वयम् ।
चतुर्भुजाः प्रजायन्ते दण्डधारणमात्रतः ॥ २३ ॥
सर्वलक्षणसंयुक्तो ब्राह्मणो गमनं चरेत् ।
गत्वा च दण्डिनं दृष्ट्वा प्रणमेद् दण्डवत् क्षितौ ॥ २४ ॥
त्वमेव देवदेवेश त्वमेव त्राणकारकः ।
त्वमेव जगतां वन्द्यस्त्राहि[२६] मां शरणागतम् ॥ २५ ॥
इति श्रुत्वा दण्डधारी पप्रच्छ सादरं जनम्[२७]।
कस्त्वं कस्य सुतस्त्वं हि कथमागमनं वद ॥ २६ ॥
श्रुत्वा तद्वचनं विप्रः प्रोवाचात्मनिवेदनम् ।
विप्रवंशे समुद्भूतो[२८] ह्यमुकोऽहं[२९] विवेकवान्[३०] ॥ २७ ॥
नास्ति मे पितरौ साक्षान्नास्ति मे स्त्रीसुतादयः ।
मृतौ च मातापितरौ मृता भ्रात्रादयः सुताः ॥ २८ ॥
पश्चात् स्वकान्तानाशे तु ह्यहमत्यन्ततापवान् ।
अत एव च[३१] भो स्वामिन् देहि मे परमाश्रयम् ॥ २९ ॥
सत्यं कुरु द्विजश्रेष्ठ यदुक्तं वै ममान्तिके ।
मिथ्याभाषणदोषेण ब्रह्मवर्त्मविवर्जितः ॥ ३० ॥
भवत्येव न सन्देहो द्विज मत्पुरतो वद ।
स्थितायां यौवनायां च कान्तायां परमेश्वरि ॥ ३१ ॥
सर्वं हि विफलं तस्य यः कुर्याद् दण्डधारणम्[३२]।
पितरौ विद्येते देवि यः कुर्याद् दण्डधारणम् ॥ ३२ ॥[३३]
विद्यते बालभावे स यस्य कान्ता सुतस्तथा ।
सन्न्यासधारणं तस्य वृथा हि परमेश्वरि ॥ ३३ ॥
स गुरुश्चापि शिष्यश्च रौरवाख्यं प्रयच्छति[३४] ।
इत्यादि दृढवाक्यं तु श्रुत्वा दण्डी जितेन्द्रियः ॥ ३४ ॥
सन्न्यासदानं तस्यैव दद्यान्मुक्तिं च शाश्वतीम् ।
<u>आदौ दशाक्षरं मन्त्रं</u> प्रथमं श्रावयेद् गुरुः ॥ ३५ ॥

२६ बन्धुः त्राहि –च, ज
२७ सादराज्जनम् –क, ख, ग । सादराञ्जलिम् –च, ज । संशोधित–सादरं जनम् ।
२८ समुद्भूतः –च, ज
२९ ह्यमुक्तोऽहं -क, ख, घ, छ
३० द्विरेफवान् -ङ
३१ हि –च, ज
३२ दन्तधावनं -ङ
३३ सन्न्यासं विफलं तस्य रौरवाख्यं स गच्छति यो पाठ मातृका घमा बढी छ ।
३४ प्रगच्छति –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तच्छ्रुत्वा च महावर्त्मगमनं कारयेत् ततः ।
क्रोशं वा क्रोशयुग्मं वा वेगेन गमनं चरेत् ।। ३६ ।।
गुरुणा सह शिष्येण पृष्ठे पृष्ठे विधानतः[३५]।
तिष्ठ तिष्ठ महाबाहो मां त्यक्त्वा नहि गच्छतु ।। ३७ ।।
शिष्यः परमहंसस्त्वं त्वत्समो नास्ति भूतले ।
क्षन्तव्यमपराधं मे त्वं हि विष्णुस्वरूपधृक्[३६]।। ३८ ।।
त्वमेव जगतां वन्द्यस्त्वमेव[३७] सर्वपूजितः ।
त्वमेव परमो हंसस्तिष्ठ तिष्ठ तु मा व्रज ।। ३९ ।।
स शिष्यो दण्डिनं देवि इति वाक्यं वदेद्यतः ।
अतः स परमो हंसः पथि शेते प्रमोहितः[३८] ।। ४० ।।
तस्यैव दर्शनार्थाय चान्तरिक्षे च देवताः[३९] ।
सस्त्रीकाः परिवाराश्च[४०] आयान्ति दिग्विदिक्षु च ।। ४१ ।।
एतस्मिन् समये दण्डी शान्तयेच्छिष्यमुत्तमम् ।
फुत्कारं बहवो[४१] दत्त्वा मन्त्रेणानेन सुव्रते ।। ४२ ।।
फुत्कारैर्वायुयोगैश्च पुनः प्राणं[४२] प्रयोजयेत्[४३]।
जन्मान्तरं तु तस्यैव तत्क्षणे जायते किल ।। ४३ ।।
जन्मान्तरं समालोक्य संस्कारमाचरेद् गुरुः ।
कुण्डान्तिके[४४] समानीय अन्नप्राशनमाचरेत् ।। ४४ ।।
अमुकस्त्वं समाभाष्य पुष्पं वह्नौ विनिक्षिपेत् ।
इति नाम्ना तु संस्थाप्य महासंस्कारमारभेत्[४५] ।। ४५ ।।
ततोऽपि दण्डिना देवि शिष्याय ज्ञानहेतवे ।
श्रृणु शिष्य महाधीर[४६] मद्वाक्यं हृदयं कुरु ।। ४६ ।।
जन्मान्तरं तु तस्यैव पृथिव्यां नाधिकारिता ।
मृतदेहस्वरूपोऽयं शरीरोऽयं न संशयः ।। ४७ ।।

---

३५ विधावयेत् –च, ज
३६ त्वमेव विष्णुरूपधृक् –च, ज
३७ बन्धुस्त्वमेव –च, ज
३८ पथिकः प्रथमोदितः –च, ज
३९ चान्तरिक्षास्थ देवताः -घ
४० सपरिवाराः -घ, ङ
४१ बहुशो –च, ज
४२ प्राणे –च, ज
४३ नियोजयेत् –च, ज
४४ दण्डान्तिके -ङ
४५ महासंस्कारमाचरेत् –च, ज
४६ महाविर -ङ । महाभाग –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

विरतो भव सर्वत्र तोयाद्याहारचेष्टया।
CC-0.In Public Domain. Digitization by eGangotri
ब्राह्मणेनैव यद्दत्तं तन्मात्रं भोजनं तव ।। ४८ ।।[४७]
पञ्चतत्त्वं सदा सेव्यं गुप्तभावे जितेन्द्रियः ।[४८]
सदैव मानसीं पूजां सदा मानसतर्पणम् ।। ५० ।।
त्रिसन्ध्यं मानसं यागं नाभिकुण्डे प्रयत्नतः ।
सदैव मानसं भोगं त्यागं कुरु प्रयत्नतः ।। ५१ ।।
षड्वर्गेषु जितो भूत्वा नरो नारायणः स्वयम् ।
भवत्येव न सन्देहो दण्डधारणमात्रतः ।। ५२ ।।
पितृवंशे सप्तदश मातृवंशे त्रयोदश ।
कान्तायाः सप्तमश्चैव लक्ष्मीनारायणो भवेत् ।। ५३ ।।
इति श्रुत्वा वचस्तस्य शिष्यश्चैतद् ब्रवीद् वचः ।
यदुक्तं मयि मुक्त्यर्थं तत् करोमि निरन्तरम् ।। ५४ ।।
पञ्चतत्त्वं सदा सेव्यं कस्माल्लाभ[४९] वदस्व मे ।
यत्रैव वर्तते दण्डी बहुशिष्यसमावृतः ।। ५५ ।।
तत्र गत्वा प्रयत्नेन पञ्चतत्त्वविचेष्टया ।
अथवा वीरमध्ये तु यत्नेन गमनं चरेत् ।। ५६ ।।
तत्त्वज्ञानिगृहस्थस्य[५०] सन्निधाने व्रजेत् किल ।
सुदूरमपि गन्तव्यं यत्रास्ते कुलनायकः ।। ५७ ।।
भिक्षाचर्या[५१] न च स्वार्थे देवतायाः कृते पुनः ।
आचार्यपत्नीं दृष्ट्वा तु भिक्षां कुर्यात् समाहितः ।। ५८ ।।
हे मातर्देहि मे भिक्षां कुण्डलीं तर्पयाम्यहम् ।
एवमुक्त्वा ततो दण्डी महासंस्कारमाचरेत् ।। ५९ ।।
कुण्डान्तिके समानीय होमयेद् विधिपूर्वकम् ।
ततो हुनेत् करं धृत्वा आज्यैरष्यहुतिं[५२] पुनः ।। ६० ।।
विपरीतक्रमेणैव कुर्याद् दण्डविशेषणम्[५३]।
ततः कुर्यात् प्रयत्नेन अन्तर्यज्ञोपवीतकम् ।। ६१ ।।
शिखां तस्य शिखामन्त्रैः पूगमध्ये[५४] निधायपेत्[५५] ।

४७ ब्रह्मणेऽपि च यद्दत्तं तन्मात्रभोजनं तव –च, ज
४८ ◦◦◦◦समासेव्यं गुप्तभावेन पार्वती –च, ज
४९ कस्माद् भावाद् –च, ज
५० तत्त्वज्ञस्य गृहस्थस्य –च, ज
५१ भिक्षा कार्या –च, ज
४७० आज्यैरप्याहुतिं –च, ज
५३ दण्डविशोधनम्. -ङ । बन्धुविशोधनम् –च, ज
५४ पुष्पमध्ये -ङ
५५ विनिक्षिपेत् –ख

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मूलेन यज्ञसूत्रं तु तस्मिन्नेव निवेशयेत् ।। ६२ ।।
घृतं मृत्तिकया पूगं[५६] विलिप्य शोधयेत्ततः[५७] ।
ततः पूगं[५८] मूलमन्त्रैर्दण्डमध्ये[५९] विनिक्षिपेत् ।। ६३ ।।
पूर्णाहुतिं ततो दद्यात् तत्पूगमानयेत् सुधीः ।
सयज्ञसूत्रं सशिखं तत्पूगं शोधयेत्[६०] प्रिये ।। ६४ ।।
मूलमन्त्रं जपेत् तत्र गजान्तकसहस्रकम् ।
ततश्च श्रावयेन्मन्त्रं कालिकायाश्च सुन्दरि ।। ६५ ।।
अथवा श्रावयेन्मन्त्रं तारायाश्च सुदुर्लभम् ।
मूलमन्त्रं समुच्चार्य पूगस्यापि[६१] प्रयत्नतः ।। ६६ ।।
भक्षणात् तत्क्षणात् साक्षाद् दण्डी यज्ञोपवीतवान् ।[६२]
भवत्येव न सन्देहो नरो नारायणो भवेत्[६३]।। ६७ ।।
बिल्वदण्डं समानीय वंशस्यैकं समानयेत्[६४] ।
बिल्वदण्डे कालिकाया जपेन्मन्त्रं प्रयत्नतः ।। ६८ ।।[६५]
जीवन्यासं ततः कृत्वा दण्डे देवीं विचिन्तयेत् ।
बिल्वस्थितं च चैतन्यं[६६] वंशदण्डे नियोजयेत् ।। ६९ ।।[६७]
इष्टदेवीस्वरूपोऽयं दण्डोऽयं परमेश्वरि ।
शिष्यस्य दक्षिणे हस्ते दण्डस्य स्थानमाचरेत्[६८]।। ७० ।।
कमण्डलुं समानीय वारुणं च प्रपूजयेत्[६९] ।
वारुणीं निक्षिपेत्तत्र मूलमन्त्रं ततो जपेत्[७०] ।। ७१ ।।
अष्टोत्तरशतं जप्त्वा तस्य वामकरे न्यसेत् ।
गैरिकं कौपीनं[७१] वस्त्रं यत्नेन परिधापयेत् ।। ७२ ।।

---

५६ घृतैश्च मृत्तिकापूगं –च, ज
५७ शोषयेत्ततः –च, ज
५८ तत्पूगं -च, ज
५९ मूलमन्त्रैः कुण्डमध्ये -ङ । मूलमन्त्रेण दण्डमध्ये –च, ज
६० पेषयेत् -ङ । प्रेषयेत् –च, ज
६१ पूगभस्मं -घ, ङ
६२ भक्षणे तत्फलात् साक्षाद् अन्तर्यज्ञोपवीतवान् –च, ज
६३ नारायणः स्वयम् –च, ज
६४ समाचरेत् -ङ
६५ ततो दण्डे न्यसेन्न्यासान् कालिकायाः प्रयत्नतः –च, ज
६६ बिल्वदण्डस्थचैतन्यं –च, ज
६७ यो पाठ मातृका 'ङ'मा छैन ।
६८ दण्डस्थापनमाचरेत् –च, ज
६९ प्रजपेत् सुधीः –च, ज
७० ततो मूलमनुं जपेत् –च, ज
७१ कपिलं –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दण्डधारणमात्रेण नरो नारायणो भवेत् ।
अद्यावधि महामायां दण्डोपरि विभावय[७२] ।। ७३ ।।
गुरुपूजा[७३] महाकालीं दण्डोपरि विभावयेत् ।[७४]
साक्षान्नारायणस्त्वं हि दयाधर्मपरो भव ।। ७४ ।।
तव माता पिता वापि[७५] सर्वे दण्डान्तिके स्थिताः[७६] ।
चौरवद् गमनं[७७] गेहे गृहस्थस्य द्विजस्य च ।। ७५ ।।
नारायणं समाभाष्य द्वारे तस्य व्रजेत् सुधीः ।
इति श्रुत्वा गृहस्थश्च[७८] पुटाञ्जलिपरो भवेत् ।। ७६ ।।
द्वारे च दण्डिनं दृष्ट्वा प्रणमेद् ब्राह्मणो वरः ।
भिक्षां दद्यात् प्रयत्नेन कूर्ममांसं[७९] विना प्रिये ।। ७७ ।।
आदाय भिक्षां देवेशि चौरवद् गमनं चरेत् ।[८०]
तथा हि नगरं गत्वा त्रिरात्रवसतिं[८१] चरेत् ।। ७८ ।।
तीर्थभूमिं ततो गत्वा सप्तरात्रं वसेत् ततः[८२] ।
ब्राह्मणो दण्डिनं दृष्ट्वा प्रणमेद् विधिपूर्वकम् ।। ७९ ।।
तोयपूर्णं च देवेशि किं वा शून्यकमण्डलुम् ।
दृष्टिमात्रेण तत्पात्रं पूर्णं कुर्याद् द्विजोत्तमः[८३] ।। ८० ।।
कुशाग्रमानं यद् बिन्दु यदि दद्यात् कमण्डलौ ।
समुद्रसप्तदानस्य फलं स लभते ध्रुवम् ।। ८१ ।।[८४]
न दद्याद्[८५] यदि मोहेन स भवेदापदाश्रयः ।[८६]
त्रिंशद्वर्षसहस्राणि वने च[८७] विटपो भवेत् ।। ८२ ।।

---

७२ विभावतः -घ । विभावनात् -ङ
७३ कुरु पूजां –च, ज
७४ यो पाठ मातृका 'ङ'मा छैन ।
७५ स्वामी –च, ज
७६ सर्वं दण्डात्मिके स्थितम् –च, ज
७७ सोऽनुपद्गमनं –च, ज
७८ गृहस्थस्तु –च, ज
७९ मधु मांसं –च, ज
८० यसभन्दा पछाडि "गृहस्थस्यालये चैव रात्रिवासं च कारयेत्" पाठ मातृका घमा बढी छ ।
८१ त्रिरात्रिं वसतिं -ङ । विरात्रं वसति –च, ज
८२ सप्ताहं वसतिं चरेत् –च, ज
८३ पूर्णतोयं भवेद् ध्रुवम् –क, ख, ग, घ, ज
८४ यो पाठ मातृका क, ख, ग मा छैन तर यहाँ आवश्यक देखिएकाले राखिएको छ ।
८५ दद्यान्न -घ, ङ
८६ दद्यादन्नं यो मोहेन स भवेत् परमाश्रयः –च, ज
८७ ऊषरे –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इति ते कथितं चण्डि[८८] सन्न्यासधारणं परम् ।
पाखण्डाय न वक्तव्यं[८९] प्राणान्तेऽपि कदाचन ।। ८३ ।।

इति निर्वाणतन्त्रे चण्डिकाशङ्करसंवादे त्रयोदशः पटलः ।। १३ ।।[९०]

---

८८ दण्डि° –च, ज

८९ न वक्तव्यं पशोरग्रे –ङ, च, ज

९० इति श्रीनिर्वाणतन्त्रे त्रयोदशः पटलः ।। –ग, घ । इति श्रीनिर्वाणतन्त्रे देवीश्वरसंवादे संन्यासविवरणं नाम त्रयोदशः पटलः -ङ ।। इति श्रीनिर्वाणतन्त्रे सन्न्यासविवरणं नाम त्रयोदशः पटलः ।। –च, ज

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तेह्रौं पटल

[नेपाली भाषानुवाद]

श्रीचण्डिकाजी भन्नुहुन्छ–

सृष्टिस्वरूप दशार्ण (दश अक्षरको) [मन्त्रको सङ्केत] त पहिले नै मलाई बताइयो । हे दयाका सागर [अब] प्रकाशरूप त्यो मन्त्र बताउनुहोस् ।। १ ।।

श्रीशङ्करजी भन्नुहुन्छ–

हे देवी! दश अक्षरको परम मन्त्र बताउँछु, सुन जसको श्रवणमात्रले मूर्ख पनि विष्णुरूप बन्छ ।। २ ।।

यो दशार्ण मन्त्र पुंमन्त्र भए तापनि यदि कसैले शक्तिमन्त्र [का रूपमा] जप्छ अथवा नजानेर त्यो महामन्त्रको जप गर्छ भने त्यो ब्रह्मराक्षस हुन्छ ।। ३ ।।

नजानेर त्यो महामन्त्रको [जप गर्नाले] यदि तत्त्वज्ञानी नै भए तापनि त्यो नरक जान्छ भन्ने देव [विष्णु]को मत छ ।। ४ ।।

हे देवी! उत्तम दश अक्षर मन्त्र भन्नेछु, सुन । हे प्यारी! मायाबीज [ह्रीँ], वधूबीज [स्त्रीँ], लक्ष्मी [श्रीँ], काली [क्रीँ], पाश [आं], गगन [हं], पक्षीबीज [बँ] त्यसपछि वह्निकान्ता [स्वाहा], यसप्रकार हे चण्डी! उत्तम दश अक्षर मन्त्र तिमीलाई भनियो ।। ५–६ ।।

यसको ज्ञानले अमरत्व प्राप्ति हुन्छ, यसमा संशय छैन । यसको ग्रहणमात्रले नर नारायण बन्दछ ।। ७ ।।

हे चण्डी! यसको प्रसादमात्रले [साधक] निर्वाण भावमा जान्छ । हे परमेश्वरी! यो दश वर्ण [मन्त्र] दण्डको माथि जपोस् ।। ८ ।।

यस मन्त्रबाट महामन्त्रहरूको उत्पत्ति हुन्छ, यसमा संशय छैन । सबै सपत्नीक देवताहरू निश्चय नै दश वर्ण [मन्त्रबाट] उत्पन्न हुन्छन् ।। ९ ।।

क्षिणस्यां दिशि स्थाने संस्थितश्च रवेः सुतः॥ काली नाम्ना पलायन्ते भीतियुक्ताः समन्ततः॥ ततः सा दक्षिणना
म्नी त्रिषु लोकेषु गीयते॥ पुरुषो दक्षिणः प्रोक्तो वामा शक्तिर्निगद्यते॥ वामया दक्षिणं जित्वा महामोक्षप्रदायिनी।
अतः सा दक्षिणा नाम्नी त्रिषु लोकेषु गीयते॥ निर्गुणं पुरुषं काल्या स्वज्यति लुप्यते यतः॥ अतः सा दक्षिणना
म्नी त्रिषु लोगीयते॥ वैष्णवी यामदा विद्या कालिका जगदम्बिका॥ साकाररूपा साकाशी चनकाकाररूपि
णी॥ हस्तपादादिरहिता सोमसूर्याग्निरूपिणी॥ तस्याः स्थानं हि कथितं सत्यलोकं वरानने॥ यत्स्थानं सर्व
देवस्य प्रार्थनीयं सदानघे॥ तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेऽधुना॥ सहस्रदलपद्मस्थे कपर्त्तिभुलो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चने॥ सहस्रगोलकंधाम अतो वक्तुं न शक्यते॥ जन्मान्तरसहस्रेण जिह्वाकोटिशतेन च। तद्वक्तुं न हि शक्नोमि एकपत्रस्य शोभनं॥ अतस्त्वं श्रिवशे हे विरता भव पार्वति॥ किं जल्कमध्ये या शोभा किं वक्तुं शक्यते
मया॥ तन्मध्ये कर्णिकां देवि तन्मध्ये बीजकोषकं॥ बीजकोषस्य मध्ये तु सुधासागरमुत्तमं॥ लक्षयो
जनविस्तारं सुसुगं तोयमंडलं॥ तन्मध्ये तु मणिद्वीपं सहस्रयोजनं शिवे॥ परितः पारिजातांश्च कदम्ब
वनमुत्तमं॥ मध्ये कल्पद्रुमं तत्र जोतिर्मन्दिरमुत्तमं। चतुर्द्वारसमायुक्तं हेमप्राकारभूषितं॥ मन्दवा
युसमायुक्तं गन्धपुष्पसमन्वितं। देवकन्यासहस्राणि परिचर्य्यापरायणाः॥ तन्मध्ये वेदिकां देवि पंचाश
द्वर्णात्मिकां॥ तस्योपरि महेशानि रत्नसिंहासनं शिवे॥ महाकाली महारुद्रश्चैनकाकाररूपकं॥ इन्दुजा
त्वस्वदीपाभं महाज्योतिः सनातनः॥ इति ते कथितं कान्ते सप्तस्वर्गक्रमेणादि॥ श्रुत्वा गोपयत्नेन न प्रका य एम
श्यं कदाचन॥ अति स्नेहेन देवेशि तव स्थाने प्रकाशितं॥ संक्षेपेण मया प्युक्तं विस्तारेण हि शक्यते॥ ॥ १४

इति श्रीचंडिकाशंकरसंवादे निर्वाणतन्त्रे सत्यलोककथनं नाम दशमः पटलः॥ ॥श्रीचंडिकोवाच॥ त्व
त्प्रसादात् महादेव पवित्रा हं न चान्यथा॥ इदानीं श्रोतुमिच्छामि तत्त्वज्ञानं सुदुर्लभं॥ श्रीशंकर उवाच
तत्वज्ञानादि कथने शंकते मम मानसं। एतत् प्रसंगश्रवणे विरता भव पार्वति॥ येन ज्ञानप्रसादेन विष्णुः
सत्वगुणाश्रयः। शृणु देवि प्रवक्ष्यामि ब्रह्मा लोकपितामहः॥ तत्वज्ञानप्रसादेन शंभुः संहारकारकः॥
अन्ये मुक्ताश्च ये सर्वे ते पि तत्वप्रसादतः॥ तत्वज्ञानं परेशानि कथं वा कथ्यते मया॥ विरता भव देवेशि न हि
पृच्छ पुनः पुनः। इति तस्य वचः श्रुत्वा शांकरी वाक्यमब्रवीत्॥ यदि त्वं महादेव न मे कथय सि प्रभो॥ प्रा
णत्यागं करिष्यामि पुरतस्ते न संशयः। श्रीशंकर उवाच॥ शृणु देवि प्रवक्ष्यामि तत्वं परम दुर्लभं॥ श्रु
त्वा गोपयत्नेन स्वयोनिरिव सुन्दरि मद्यं मांसं तथा मत्स्यं मुद्रां मैथुनमेव च॥ पंचतत्वमिदं देवि निर्वाणमु
क्तिहेतवे॥ अष्टैश्वर्य्यं परं मोक्षं मद्यपानेन शैलजे॥ मांसभक्षणमात्रेण साक्षान्नारायणो भवेत्॥
मत्स्यभक्षणमात्रेण काली प्रत्यक्षतां भवेत्॥

मुद्रासेवनमात्रेण भूपृष्ठे विष्णुरूपधृक्॥ मैथुनेन महायोगी मम तुल्यो न संशयः॥ तंत्रान्तरे तु देवि
शि मयैव कथितं पुरा॥ माहात्म्यं चास्य धर्मस्य पुरैव कथितं मया। तत्वज्ञानमिदं कान्ते निर्वाणमुक्तिकार
णं॥ एकत्र पंच तत्वानि। यत्रैव मिलनं भवेत्। तत्रैवाहं प्रगच्छामि तेन रामत्वमाः सदा॥ सा नारी कालि
का रूपा मत्तेजस्यां प्रलीयते॥ येनराः साधुरूपाश्च तत्वज्ञानपरायणाः॥ जीवन्मुक्ताश्च ते प्रोक्ता ब्रह्मरू
पा न चान्यथा। सायुज्यापि महामोक्षं नि मुक्तं क्षत्रियादिषु॥ ब्राह्मणः परमेशानि यदि तत्वपरायणः॥
सत्यं सत्यं पुनः सत्यं परतत्वे प्रलीयते॥ यथा तोयं तोयमध्ये लीयते। परमेश्वरि॥ तथैव तत्वसेवायां लीय
ते परमात्मनि॥ इति ते कथितं कान्ते तत्वज्ञानं विमोक्षदं॥ येन ज्ञानप्रसादेन मोक्षसिद्धिर्न संशयः॥ क्षि
तिं विना यथा नास्ति संस्थितेः कारणं सदा। तोयं विना यथा नास्ति पिपासानाशकारणं॥ तमोहन्ता यथा ना एमः
स्ति भास्करेण विना प्रिये॥ विना वह्निप्रयोगेन यथा किंचिन्न पच्यते॥ विना चंद्रेण देवेशि सुधावृष्टिर्न जा १५

यते॥ आत्मगर्भं विना कान्ते ह्युत्पत्तिर्नयथा भवेत्॥ तत्वज्ञानं विना देवि तथा मुक्तिर्न जायते॥ अत एव म
हेशानि गोपनं कुरु यत्नतः॥ दिव्यभावयुक्तानां च तत्वज्ञानं सदा भवेत्॥ वीरभावयुतानां वै तत्त्वं सेव्यं सदा
नघे॥ न पशोरालये कुर्य्यात् पशोर्न गोचरे॥ न पशोः सन्निधाने च न पशोर्दृष्टिगोचरे॥ अन्यथा पक्षि
कीटस्य दर्शने नैव कारयेत्॥ सिद्धिवर्णे शृणु प्राज्ञे यत्कृत्वा सिद्धिमाप्नुयात्॥ एकां शक्तिं समानीय प
रेकैव साधकः सदा। पूजयेद्धि प्रयत्नेन पंचतत्वेन कौलिकः॥ एवं कृत्वा लभेत् सिद्धिं नान्यस्य दृष्टिगोच
रे॥ श्रीचक्रपूजा यत्रैव तत्रैव धनसिद्धये॥ सिद्धिर्न जायते तत्र कदाचिदन्यसन्निधौ॥ तत्रैव कामनासि
द्धिर्यत्र चक्रं प्रपूजयेत्॥ आयुरारोग्यमैश्वर्यं श्रीचक्रपूजनाद्भवेत्॥ कीर्त्तिवृद्धिर्यशोवृद्धिर्मुक्तिभागी
न संशयः॥ वांछासिद्धिर्ज्ञानसिद्धिर्देव्याः प्रीतिश्च जायते॥ श्रीचक्रपूजां यः कुर्य्यात् स एव शंभुरव्ययः। अ
श्वमेधसहस्राणि वाजपेयशतानि च। इष्टापूर्तफलमाप्नोति तत्फलं कौलिकार्चने। वापीकूपतडागा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दि दत्वा पत् फलमाप्नुयात्॥ नतफलात् कोटिगुणितं यदि चक्रं प्रपूजयेत्॥ तदन्नं मेरु तुल्यं द्विर्दुः स्वा
सिन्धु समोपमं॥ पुष्पं च मेरु सदृशं यदि चक्रं प्रपूजयेत्॥ तन्मध्ये वर्त्तते देवि यदि व्याधियुतो नरः॥ शि
वबुध्या प्रपूज्यो हि भ्रान्तिं तत्र विवर्जयेत्॥ सूर्य्यस्य प्रतिबिम्बं यत्तत्तोये परिपश्यति॥ गंगा तोये यथा सू
र्य्यो हीन तोये तथा पुनः। सूर्य्यस्य दूषणं नास्ति सूर्य्यैकः परिति ष्ठति॥ तथैव परमेशानि साधके नास्ति दू
षणं॥ मल्लाराधन मात्रेन तदात्मो तन्मयो भवेत्। अत एव महेशानि दूषणं नास्ति रेतसि। रेतः पवित्रं
परमं शक्तिर्मोक्षस्य कारणं॥ पूजाहीना च या शक्तिर्जपहीना च या पुनः॥ धृत्वा साधकरे तथ स्नाना
री कालिकाश्रयं॥ भ्रान्तिरत्र न कर्त्तव्या यदि मुक्तिं प्रयच्छति। या नारी भ्रान्तिसंयुक्ता आगता चक्रमंडले॥
सप्तजन्मनि सा नारी चांडाली पतिवर्जिता। एवं रूपां च यां नारीमवज्ञां कुरुते यदि॥ धनपुत्रवर्जितश्च स
चंडालो न चान्यथा॥ इति ते कथितं कान्ते तत्वज्ञानं मयोदितं। ते पुनर्जननी गर्भे निवि पुन्ति कदाचन। जीव एमः १८

विमोक्षदं· येनौरेहमहेशा नितत्वज्ञानं

स्मुक्ता श्च ते प्रोक्ताः शिवरूपाश्च ते नराः॥ शृणु देवि प्रवक्ष्यामि कौलिकस्य च लक्षणं॥ यस्मिन् देयदा वे
चारो निर्दिष्टो मंत्रसाधने॥ न राचारविशिष्टो यः कौलिकः सैव कीर्त्तितः॥ शैवे शाक्ते गाणपत्ये सौरे चां
द्रे सुलोचने। तत्वज्ञानमिदं प्रोक्तं वैष्णवे शृणु यत्नतः॥ इति निर्वाणतन्त्रे तत्वज्ञान विवरणं नाम ए
कादशः पटलः॥ ॥श्रीचंडिकोवाच॥ शृणु नाथ परानन्द मम प्राणेश्वर प्रभो॥ वैष्णवस्य यथा तत्वं त
न्मे ब्रूहि जगत् पते॥ श्रीशंकर उवाच॥ शृणु तत्वं वरारोहे वैष्णवस्य त्रिलोचने॥ गुरुतत्वं मंत्रतत्वंव
र्णतत्वं सुरेश्वरि॥ देवतत्वं ध्यानतत्वं पंचतत्वं वरानने॥ तत्रादौ श्रीगुरोस्तत्वं कथयामि पार्वति॥
सत्तैलं वर्त्तिकायुक्तं देहस्थं त्र स्लनैज सं॥ गुरुणा मंत्रदानेन ततः स्तत्रं दीपितं भवेत् देवतायाः शरीरं
हि जीवा दुत्पद्यते ध्रुवं॥ अत एव हि तस्यात्मा देवरूपो न संशयः॥ ईश्वरस्य तु यद्बीजं तदेव ब्रह्म क्षरा
त्मकं॥ तेन वर्णात्मकं देहं जंतो देवनसंशयः। मंत्रवर्णो सि वर्णाली यन्ते परमेश्वरि॥ वर्णतत्वमिदं दे
ति

विमम सर्वस्वं यद्भवेत्॥ स्वयं देवो न चान्यो स्मिनि र्मलो देवरूपकः। सर्वत्र देवतां ध्यायेत् तृणगुल्मलतादिषु॥ ध्या
नेन लभते सर्वं ध्यानेन विष्णुरूपकः॥ ध्यानेन सिद्धिमाप्नोति विना ध्यानेन सिध्यति। इति ते कथितं देवि वैष्णवस्य
सुरेश्वरि॥ यज्ज्ञानादमरत्वं च विष्णुरूपो न संशयः॥ यः कुर्य्यात् परमेशानि तत्वज्ञानं मयोदितं॥ स्वर्गभा न
गी भवेन्मर्त्यो विष्णुलोके महीयते॥ यदि भक्तियतो मर्त्यो मनसा चिन्तयेत् सदा॥ तेन रानद्धि गच्छन्ति कदाचि
द्य ममन्दिरं॥ इति ते कथितं तत्वं वैष्णवस्य सुरेश्वरि॥ यज्ज्ञानादमरत्वं च लभते नात्र संशयः॥ इति श्रीनि र्ण
र्वाणतंत्रे वैष्णवोस्तत्वकथनं नाम द्वादशः पटलः॥ श्रीचंडिकोवाच॥ सद्यात्मकं दशार्णं च पूर्वं वै कथितं एमः
तुमे॥ प्रकाशरूपेण तंत्रं कथय स्वदयानिधे॥ श्रीशंकर उवाच॥ शृणु देवि प्रवक्ष्यामि मंत्रं दशाक्ष १७
रं परं॥ यस्य श्रवणमात्रेण मूढोपि विष्णुरूपकः॥ पुंमंत्रोपि च देवेशि शक्तिमंत्रं जपेद्यदि॥ अज्ञात्वा
तन्महामंत्रं स भवेद् ब्रह्मराक्षसः॥ अज्ञात्वा तन्महामन्त्रं तत्वज्ञानी भवेद्यदि॥ तथापि नरकं गच्छेदिति दे

वस्य सम्मतं॥ शृणु देवि प्रवक्ष्यामि दशार्णमंत्रमुत्तमं॥ मायाबीजं वधूबीजं लक्ष्मी कलीं च पाशकं॥ गगणं पक्षि बीजं च
वह्निकान्तां ततः प्रिये। इति ते कथितं चंडि दशाक्षर मनूत्तमं। यज्ज्ञानादमरत्वं च लभते नात्र संशयः॥ अस्य
श्रवणमात्रेण नरो नारायणो भवेत्॥ अस्य प्रसादमात्रेण चंडि निर्वाणतां व्रजेत्। देवोपरि जपेदेतत् दशा
र्णं परमेश्वरि॥ अस्य मंत्रात् महामंत्रा जायन्ते नात्र संशयः॥ सर्वे देवाः सदा राश्च दशार्णी ज्ञापते ध्रुवं॥ म
हाविद्यापासकश्च दशार्णं न हि पश्यति॥ इहलोके दरिद्रश्च परे च ब्रह्मराक्षसः॥ तस्माद्यत्नेन देवेशि दशा
र्णं श्रावये द्गुरुः॥ केवलं श्रवणं कुर्य्यात् जपेत् साधकोत्तमः॥ यः श्रावयेद्दशार्णं च। स नरो गुरुरुत्तमः॥ मं
त्रदाता यथा देवि तथैव स गुरुः स्मृतः। दशार्णदाता यो देवि स एव परमो गुरुः॥ यथा मरतरंगिन्या न १
समासह कलापगा॥ दशार्णस्य समो नास्ति मंत्रोपि सुरपूजिते॥ त्वत्समा यदि नारी च मत्समः पुरुषोस्ति
च। दशार्णस्य समो नास्ति मंत्रो हि कथ्यते मया॥ दशकान्तेस्य स्वर्णस्य दर्शलौहमस्ति चेत्॥ दशार्णस्य
म

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

समंत्रं कथयेमुस्तदाप्रिये॥ श्रीप्रासारीलयमंत्रोदशार्णः परमेश्वरि। ऊर्द्धाम्नायेमहातंत्रेमाहात्म्यंकथया
मिते॥ अतः परंप्रवक्ष्यामियद्रूपं दंडधारणं॥ साधुरूपोगृहस्थश्च ब्राह्मणोब्रह्मवादिनः॥ सर्वोपायपरित्य श्च
क्तः सदाधर्मपरायणः॥ जितेंद्रियोजितक्रोधः समत्वंसर्वजातिषु॥ इष्टे रिपौसमत्वंच समंस्वर्णेचपार्थिवे॥
दयाभावश्चसर्वत्र पुत्रेमित्रेरिपौभवेत्॥ लाभालाभेजयेनाशेनिन्दायांपोष्टिकेतथा॥ कायेप्राणेनसं
बंधेमस्तु मारस्य युगान्तिके॥ ब्रह्मज्ञानंविनाज्ञानंयस्यचित्तेनविद्यते॥ सन्यासधर्मंतस्यैवनान्यस्य
सुरपूजिते॥ सन्यासधारणं कार्य्यंविप्रस्यमुक्तिहेतवे॥ योविप्रोधारयेद्दंडं सेवनारायणः स्वयं॥ चतुर्भुजाः प्र
जायन्ते॥ दंडधारणमात्रतः॥ सर्वलक्षणयुक्तो ब्राह्मणोगमनंचरेत्॥ गत्वाचदंडिनंदृष्ट्वाप्रणमेत्दंड
वत्क्षितौ॥ त्वमेवदेवदेवेश त्वमेवब्राणकारकः॥ त्वमेवजगतांवन्द्यस्त्राहिमांशरणागतं॥ इतिश्रुत्वादंड रामः
धारीपप्रच्छसादरात्मजनं॥ कस्त्वंकस्यसुतस्त्वंहिकथमागमनम्वद। श्रुत्वातद्वचनंविप्रः प्रोवाचात्मनिवे १८

ना२

दनं॥ विप्रवंशेसमुद्भूतो ह्यमुक्तोऽहंविवेकवान्॥ नास्तीमेपितरौसाक्षात्। नास्तिमेस्त्रीसुतादयः॥ मृतौचमा
तापितरौमृतावभ्रात्रादयः सुताः॥ पश्चात्सकान्ताशिनु। ह्यहमत्यन्तनापवान्॥ अतएवंभोस्वामिन्। देहिमे बः
परमाश्रयं। सत्यंकुरुद्विजश्रेष्ठयदुक्तंवैममान्तिके॥ मिथ्याभाषणदोषेणब्रह्मवर्त्मविवर्जितः॥ नव
त्येवनसन्देहोद्विजमत्सुरतोवद॥ स्थितायांयौवनायांश्चकान्तायांपरमेश्वरि॥ सर्वंहिविफलंतस्य
यःकुर्य्याद्दंडधारणं॥ पितरौविद्येतेदेवि यः कुर्य्याद्दंडधारणं। विद्यतेचवालभावोयस्यकान्तासुत
स्तथा। सन्यासधारणंतस्य वृथाहिपरिमेश्वरि॥ सगुरुश्चापिशिष्यश्चरौरवाख्यंप्रयच्छति॥ इत्या
दिवहवदवाक्यन्तुश्रुत्वादंडीजितेंद्रियः॥ सन्यासदानंतस्यैवदयासुक्तीचसास्वती। ओंदेवणाक्ष
रंमंत्रंप्रथमंश्रावयेद्गुरुः। तत्श्रुत्वाचमहावर्त्मगमनंकारयेत्ततः॥ क्रोशंवाक्रोशयुग्मंवा वेगेनगम
नंचरेत्॥ गुरुणासहशिष्येणदृष्टे। दृष्टेविधावतः॥ तिष्ठतिष्ठमहावादोमांत्यक्त्वानहिगच्छतु॥

शिष्यः परमहंसस्त्वंतत्समोनास्तिभूतले॥ क्षन्तव्यमपराधंमेत्वंहिविष्णुः स्वरूपधृक्। त्वमेंजगतां
वन्द्यस्त्वामेवसर्वपूजितः॥ त्वमेवपरमोहंसस्तिष्ठतिष्ठतुमाव्रज॥ सशिष्यदंडिनादेवि इतिवाक्यंवदे
त्यतः॥ अतः सः परमोहंसः पथिशेतेप्रमोदितः॥ तस्यैवदर्शनार्थायचान्तरीक्षेसदेवताः॥ सस्त्रीकाः
सपरिवाराः आयान्तिदिग्विदिक्षुच। एतस्मिन्समयेदंडीशान्तयेतशिष्यमुत्तमं॥ फूत्कारंवहवो
दत्वामंत्रेणानेनसुव्रते॥ फूत्कारैर्वायुयोगेश्चपुनःप्राणंप्रयोजयेत्॥ जन्मान्तरन्तुतस्यैवनतक्ष
योजायतेकिल। जन्मान्तरंसमालोक्य संस्कारमाचरेत्गुरुः॥ कुंडोन्तिकेसमानीय। अन्नप्राशनमा
चरेत्॥ अमुकस्यंसमाभाष्यपुष्पंवह्नौविनिक्षिपेत्॥ इतिनाम्नातुसंस्थाप्यमहासंस्कारमारभेत्॥ रामः
ततोपिदंडिनादेविशिष्यायज्ञानहेतवे॥ शृणुशिष्यमहाधीरमद्वाक्यंहृदयंकुरु॥ जन्मान्तरंतुत १९
स्यैवदृष्टिव्यानाधिकारिता॥ मृतदेहस्वरूपोयंशरीरोयंनसंशयः॥ विरतोभवसर्वत्रतोपाद्याहारचे

ष्टया। ब्राह्मणेनैवयद्दत्तं तन्मात्रंभोजनंतव॥ पंचतत्वंसदासेव्यंगुप्तभावेजितेन्द्रियः॥ सदैवमानसीं
पूजांसदामानसतर्पणं॥ त्रिसन्ध्यं मानसंयागंनाभिकुंडेप्रयत्नतः॥ सदैवमानसंभोगंत्यागंकुरुप्र
यत्नतः। षड्वर्गेषुजितोभूत्वानरोनारायणः स्वयं॥ भवत्येवनसन्देहोदंडधारणमात्रतः॥ पितृवंशो
सप्तदश मातृवंशोत्रयोदश। कांतायाःसप्तमश्चैवलक्ष्मीनारायणोभवेत्॥ इतिश्रुत्वावचस्तस्यशि
ष्यश्चैतानब्रवीद्वचः॥ यदुक्तंमयिमुक्तंपर्यातत्करोमिनिरन्तरं॥ पंचतत्वंसदासेव्यंकस्माल्लाभंवद
स्वमे॥ यत्रैववर्त्ततेदंडीवद्धशिष्यसमावृतः॥ तत्रगत्वाप्रयत्नेन पंचतत्वविचेष्टया॥ अथवावीर
मध्येतुपत्नेनगमनंचरेत्॥ तत्त्वज्ञानिगृहस्थोंसन्निधानेव्रजेत्किल॥ सुदूरमपिगन्तव्यंयत्रास्ते
हितः। देमानदेहिमेभिक्षांकुंडलीतर्पयाम्यहं। एवमुक्त्वाततोदंडीमहासंस्यारमाचरेत्॥ कुंडान्ति

स्व३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

केसंमोनी यद्दोमयेद्विधिपूर्वकं॥ ततो द्रूनेतकरं घृत्वा आज्येन ष्ठाद्रुतीपुनः॥ विपरीतक्रमेणैव कुर्प्या
दुंडविशेषणं॥ ततः कुर्प्यात्प्रयत्नेन भन्तर्येज्ञोपवीतकं॥ शिखान्तस्यपि[illegible]खा मंत्रैः पूगमध्येविनि
क्षिपेत्॥ मूलेन यत्तसूत्रन्तु तस्मिन्नेव निवेशयेत्॥ घृतमृत्तिकया पुगंविलिप्य शोधयेत्ततः॥ ततः
पूगंमूलमंत्रै दंडमध्येविनिःक्षिपेत्॥ पूर्णाहुतिं ततो दद्यात्तत पूगमानयेत् सुधीः॥ यज्ञसूत्रं स
शिखायां तत पुगंशोधयेत् प्रिये॥ मूलमन्त्रं जपेत्तत्र गजान्तकसहस्रकं॥ ततश्च श्रावयेन्मंत्रं
कालिकायाश्च सुन्दरि॥ अथवा श्रावयेन्मंत्र तारायाः परमदुर्लभं॥ मूलमन्त्रं समुच्चार्य्य पूगभस्मप्र
यत्नतः। भक्षणान्नन्क्षणात्साक्षाद्दंडीयज्ञोपवीतवान्॥ भवत्येव न संदेहो नरो नारायणोभवे एमः
त्॥ विल्वदंडं समानीयेवंशसेकं समानयेत्॥ विल्वदंडे कालिकायाजपेन्मन्त्रं प्रयत्नतः॥ जीवन्या २०
संततः कृत्वा दंडे देवी विचिन्तयेत्॥ विल्वस्थितं च चैतन्यं वंशदंडेनियोजयेत् दृष्टदेवीस्वरूपेण

दंडोयं परमेश्वरि॥ शिष्यस्य दक्षिणेहस्ते दंडस्यस्थानमाचरेत्॥ कमंडलुं समानीयवारुणं प्रपूजयेत् व
वारुणं निक्षिपेत्तत्र मूलमंत्रं ततो जपेत्। अष्टोत्तरशतंजप्त्वा तस्यवामकरेन्यासेत्। गैरिकं कौपिनं वस्त्रंय
त्नेन परिधापयेत्॥ दंडधारणमात्रेण नरो नारायणोभवेत्॥ अथावधिमहामा[redacted]यां दंडो परिविभावय।
गुरुपुजां महाकाली दंडो परिविभावयेत्॥ साक्षान्नारायणस्त्वं हि दयाधर्मपरोभव॥ तवमाता पिता वा
पि सर्वं दंडान्तिके स्थितं॥ चौरवद्भ्रमनं गेहे गृहस्थस्य द्विजस्य च। नारायणं सदा नाप्य द्वारे तस्य व्रजे
त्सुधीः॥ इतिश्रुत्वा गृहस्थश्च पुटाञ्जलि परो भवेत्॥ द्वारे च दंडिनं दृष्ट्वा प्रणमेत् ब्राह्मणोवरः॥ भी
क्षां दद्यात्प्रयत्नेन कूर्म्मगांसं विनाप्रिये॥ आदाय भीक्षां देवेशि चौरवद्भ्रमनं चरेत्॥ तथाहि नगरं ग
त्वा त्रिरात्रं वसतिं चरेत्। तीर्थभ्रमिं ततो गत्वा सप्तरात्रं वसेत्ततः॥ ब्राह्मणो दंडिनं दृष्ट्वा प्रणमेद्विधि
पूर्वकं। तोयपूर्णं च देवेशि किं वा शून्य कमंडलुं॥ दृष्टिमात्रेण तत् पात्रं पूर्णं तोयं भवेद्ध्रुवं॥ दद्यान्न

यदिमोहेन सम्भवेदापदाश्रयं॥ त्रिंशद्वर्षसहस्राणि वनेच विटपो भवेत्॥ इति ते कथितं चंडि संन्यास
धारणं परं॥ पाषंडायनवक्त्रं यं प्राणान्नेपिकदाचन॥ ॥इति निर्वाणतंत्रे चंडिशंकरसम्वादे त्रयोदश का२
पटलः॥ श्रीशंकर उवाच॥ ॥शृणु देवि प्रवक्ष्यामि अवधुतो यथा भवेत्॥ वीरस्य मूर्त्तिं जानीयात् सदा
तत्वपरायणं॥ यद्रूपं कथितं पूर्वं संन्यासधारणं परं॥ तद्रूपं सर्वकर्म्माणि प्रकुर्पाद्वीरवल्लभः॥ दं
डिनं मुंडनं देवि आवश्यकं समाचरेत्॥ यथा तथा भवेत् कुर्प्याद्वीयस्य च मुंडनं॥ असंस्कृतकेशा
नां मुंडनेक्षिकु चोत्तयां॥ अस्थिमाला विभूषो वा रुद्राक्षान् वापि धारयेत्॥ दिगम्बरो वा वीरं प्र व्याघ वा कौ
पिनी भवेत्॥ रक्तचंदन दिव्यांगः कुर्प्याद्भस्मांगभूषणं॥ क्षमादानं तपो ध्यानं वीरभावेन शैलजे॥ शि एमः
वोहंभैरवानन्दो मुक्तोहं कुलनायकः॥ एवं भावपरो मंत्री हेतुयुक्तः सदा भवेत्॥ सम्विदासेवनं कुर्प्या २१
त्। सदाकारणसेवनं॥ भवेत् साक्षात्सुपुरुषः शंभुरूपो न संशयः॥ निर्वाणमुक्तिमाप्नोति ब्राह्मणो वी

रभावतः॥ अवधूतः क्षत्रियश्च महायोगी न संशयः॥ स्वरूपोपि भवेद्वैश्यः शूद्रोपि सद्गलोकभाक्॥ संप्र
र्णफलमाप्नोति विप्रो निर्वाणतां व्रजेत्॥ त्रिभाग फलमाप्नोति क्षत्रियो वीरभावतः॥ पादद्वयन्तु वैश्यस्य
शूद्रस्य चैकपादकं॥ ब्राह्मणस्य विनान्यत्र संन्यासोनास्ति चंडिके॥ कुर्प्यान्मोहेन योन्यत्र सेव पापाश्रयो
नरः। शुभभावेन देवेशि शृणु यात् प्राणवल्लभे॥ संन्यासिना सदा सेव्यं। पंचतत्वं वरानने॥ द्वादशाब्दे
तु देवेशि यदि मृत्युर्नजायते। सेवचानन्द विख्यातो द्वादशाब्दे सरस्वती॥ अवधूतस्य चाख्यातः शृणुष
पर्वतात्मजे॥ वनारण्ये भारती च पुरी च गिरि रेव च॥ एक स्थाने च संस्थित्वा इष्टध्यानादिकं चरेत्॥ पो
मंत्रः तद्ब्रह्मभाक्तः शरणः परिकीर्त्तितः। श्रेष्ठ के शोज्जटाजूटः सदात्वचलवत्चरेत्। अन्तयोगी महावी
रो हरन्यः सेवशैलजे॥ नानाशास्त्रेषु योविज्ञो नानाकर्म्मविशारदः॥ सदेष्टदेवीभावेन भाव यो।
घोहि चांगनां। सएव भारते वीरो महाज्ञानी जितेन्द्रियः॥ सदोर्ध्वबाहुर्योवीरो मुक्तकेशो दिगम्बरः॥ स

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एवममभावेनभावयेद्योनरोत्तमः। इष्टदेवी विना नास्ति शवीरः परिकीर्त्तितः। ना नादेवेष्वपीठेषु क्षेत्रेषु तीर्थभूमिषु॥ भ्रमणं कुरुते नित्यं कुर्य्यादियत्नेन पूजनं। देवतायाः सदा ध्यानं श्रीगुरोः पूजनं तथा॥ अन्तर्योगेन योनिष्ठः स वीरः पुत्र देवच। अवधूताश्रमो देवि यस्य भक्तिः सुनिश्चला॥ तस्य तुष्टा भवेत् काली किं न सिध्यति भूतले॥ अवधूतं समालोक्य शंभूवत् पूजनं चरेत्। शक्तितः पंच तत्त्वानि यत्नेन च निवेदयेत्॥ पंचतत्त्वं विना भद्रे आनन्दो नैव जायते॥ अतो हि भक्तिभावेन तेनैव पूजनं चरेत्॥ इति ते कथितं कान्ते अवधूतस्य लक्षणं॥ येन विज्ञानमात्रेण शिवत्वं लभते नरः॥ शठाय भक्तिहीनाय न दातव्यं कदाचन॥ गुरुभक्तिविहीनाय तत्त्वनिन्दापराय च॥ इदं तंत्रं सुगुप्तं च प्राणान्तेपि कदाचन॥ न श्रावयेद् भक्ताय सिद्धिहानिः प्रजायते॥ कदाचिद्दास्ये पुत्राय गमः २२

स्वशिष्याय महात्मने॥ श्रावयेद् भक्तियुक्ताय यदि तद्योग्यता भवेत्। श्रुत्वा गोपय यत्नेन स्वयोनिमिव शैलजे। संक्षेपात् कथितं किंचित् किमन्यत् श्रोतुमिच्छसि॥ ॥ इति श्रीनिर्वाणतन्त्रे चंडिका शंकर संवादे अवधूताश्रमविवरणं नाम चतुर्दशः पटल समाप्तः॥ १॥ संवत् १८५५ १॥ १। ॥१॥

इदम् पुस्तकम् श्रीश्रीश्रीरणबहादुरसाहदेवस्य २३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri


A.959/90

श्रीराष्ट्रिय अभिलेखालय
नेपाल

NATONAL ARCHIVES
NEPAL

विषयः शैव तन्त्रम् — Subject:
पुस्तक नामः निर्वाणतन्त्र — Mansccript-Name:
ना. सं. पं २७४१ — C. No.
क्रि. सं. ६९५ — S. No.
पत्र सं: १६ — Folio. No.
आकार ३६ X १५ १/२ — Size.





CC-0.In Public Domain. Digitization by eGangotri

निःतं॰ २

वाणतंत्रे प्रथमः पटलः॥१॥ ॥श्रीचंडिकोवाच॥ त्वत्प्रसादान्महादेव श्रुतं ब्रह्मनिरूपणं॥ इदानीं श्रोतुमिच्छामि क्षितौ सृष्टिर्यथा भवेत्॥ ॥श्रीशिवउवा
च॥ शृणु देवि प्रवक्ष्यामि यथा सृष्टिः प्रजायते॥ सत्यलोके महाकाली महारुद्रेण संयुता॥ रूपं कामकला विस्तारं चंद्रसूर्याग्निरूपकं॥ अनादिपुरुषं प्र
च॥ शृणु देवि प्रवक्ष्यामि यथा सृष्टिः प्रजायते॥ ... तदैव सहसा देवि सृजायुक्तो भवत्यपि
त्यानंदसा जीवसंज्ञकाः॥ ज्वलदग्नेर्यथा देवि स्फुरंति विस्फुलिंगकाः॥ तस्याश्च तत्परं विंदु यदा भूमौ पतत्यपि॥ तदैव सहसा देवि ... भवत्यपि
स्थावरादिषु कीटेषु पशुपक्षिषु शैलजे॥ चतुरशीतिलक्षं वै जन्म चाप्नोति सोव्ययः॥ ततो लभेत्परेशानि मानुष्यं दुर्लभं ततः॥ यतो मानुषदेहस्तु ध
र्माधर्मादिपक्षसः॥ ततोपि लभते जन्म पुनर्मृत्युमवाप्नुयात्॥ जायते म्रियते चैव कर्मपाशात्तु निश्चयः॥ चतुरशीतिलक्षेषु नानायोनिषु शैलजे॥ ॥निप
॥श्रीचंडिकोवाच॥ कथं वा लभते जन्म कथं मृत्युर्भवेत्प्रभो॥ तत्सर्वं महादेव श्रोतुमिच्छामि तत्त्वतः॥ ॥श्रीशंकरउवाच॥ इह यत् क्रियते कर्म त
त्सर्वं चोपभुज्यते॥ जीवस्त्यक्त्वा जरां लोके वै देहाद्देहांतरं व्रजेत्॥ संप्राप्य चांतरं देहं देहं त्यजति पूर्वजं॥ इति श्रुत्वा च सा चंडी पप्रच्छ परमेश्वरं
॥मांसे चोत्तरदेहे तु पिंडदानादिकं कथं॥ शृणु देवि प्रवक्ष्यामि मायादेहं तदेव हि॥ माया देहः परेशानि वायुरूपो न चान्यथा॥ वायुरूपो यतो
देह आकाशस्थो निराश्रयः॥ अतश्च पिंडदानेन वायुस्थिरतरो भवेत्॥ प्रथमे मासिकं देवि जायते च क्रमाद्वधि॥ ततो यमपुरं गत्वा ध
र्माधर्मादिकं हि यत्॥ तद्भुक्त्वा च परे किंचित्तद्यदकर्म न विद्यते॥ यमाज्ञया ततो जीवः प्रयाति ब्रह्मसाधनं॥ तस्मात्कर्मानुसारेण गिरि ४

वपा।

यदि स्यात् दुर्लभं तत्तु महाविद्यां भाग्यवशात्ततः प्राप्नोति परमं गुरुं॥ तत्त्वज्ञानं महेशानि यदि भाग्यं लभेत्॥ तदैव परमं मोक्षं याव ब्रह्मांडस्थि
तिः॥ ब्राह्मणस्य महामोक्षं सायुज्यं क्षत्रियस्य च॥ सारूप्यं चोक्तमात्रस्य शूद्रस्य सहलोककं॥ महाविद्याप्रसादेन पुनरागमनं नहि॥ इह ब्रह्मां
डशेषे तु सर्वमोक्षं यदाशिवे॥ तदा सर्वस्य निर्वाणं भवत्येव न संशयः॥ ॥श्रीचंडिकोवाच॥ इह ब्रह्मांडवाशेषे तु किं पुनः परमेश्वर॥ तत्सर्वं श्रो
तुमिच्छामि यदि स्नेहोस्ति मां प्रति॥ ॥श्रीशंकरउवाच॥ ब्रह्मांडस्य बहिर्देशे ब्रह्मांडाब्जहृदःस्थितः॥ अनंतस्य प्रमाणं तु किं वक्तुं शक्यते म
या॥ सारचनिर्मितं सर्वं सेवसर्वं मुरेश्वरि॥ ॥इति श्रीचंडिकाशंकरसंवादे निर्वाणतंत्रे द्वितीयः पटलः॥२॥ ॥श्रीशिवउवाच॥ प्रकृत्या जाय
ते पुंसां प्रकृत्या सृज्यते जगत्॥ तोयाद्यद्बुदं देवि यथा तोये विलीयते॥ प्रकृत्या जायते सर्वं पुनस्तस्यां विलीयते॥ तस्मात्प्रकृतियोगेन ज्ञायते
नान्यथा क्वचित्॥ ब्रह्मविष्णुशिवं देवि प्रकृत्या जायते ध्रुवं॥ तथा प्रलयकाले तु प्रकृत्या लुप्यते पुनः॥ शाक्ताश्च द्विजाः सर्वे न शैवा न च वै
ष्णवाः॥ उपासते यतो देवीं गायत्रीं परमाक्षरीं॥ गायत्री शृणु चार्वंगि चतुर्वेदप्रपूजितां॥ वेदमातेति विख्यातां त्रिवर्गफलदायिनीं॥ हाला
हलं समुद्धृत्य नाभ्यक्षरं समुद्धरेत्॥ वामकर्णसमायुक्तं पुनर्नाभिं समुद्धरेत्॥ कर्णयुक्तं मूर्द्धरेफं तत्र श्वसुरवन्दिते॥ वारुणं च समायुक्तं
चंद्रबीजं ततः परं॥ नादयुक्तं खगयुतं च कंचाद्धृत्य समुद्धरेत्॥ तत्त्वं समुद्धृत्य सवितुस्तदनंतरं॥ वरेण्यमिति चोच्चार्य भर्गो देवस्य धी

निःतं॰ ३

महि॥ धियो यो नः प्रचोदयात्॥ प्रणवं तदनंतरं॥ ततश्चाधीत गायत्रीं प्रणवं तदनंतरं॥ इति जप्त्वा महेशानि साक्षान्नारायणो भवेत्॥ धियो योर्म्मप्र
भागे च यकारद्वयमेव च॥ तत्रतत्र महादेवि अनंतश्रुतिमेव च॥ इति जप्त्वा महेशानि मुक्तो भवति तत्क्षणात्॥ अत्र यकारयोः स्थाने योकारद्वितयं
पठेत्॥ सर्वाक्षरमिति ख्यातो ब्रह्महत्यादि नैव हि॥ अतएव महेशानि तव स्नेहात्प्रकाशितं॥ सावित्री परमा विद्या त्रैलोक्ये सुदुर्लभा॥ अस्या
ग्रहणमात्रेण भूर्भुवः स्वोनाम्नः संशयः॥ अंगन्यासस्य मंत्रस्य तु शृणुष्व प्रियंवदे॥ प्रणवं हृदयं ह्यत्र भूकारं शीर्षदेशके॥ भुवः शिखायां
कारं कवचे विन्यसेत्सुधीः॥ नेत्रत्रये भूर्भुवः स्वः स्वःकारं करयुग्मके॥ नमः स्वाहा वषट् हुं वौषट् फट् च क्रमतो न्यसेत्॥ ध्यानं शृणु वरा
रोहे यथा ध्यात्वा यजेन्नरः॥ श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा॥ श्वेतैर्विलेपनैः पुष्पैरलंकारैश्च भूषिता॥ आदित्यमंडलस्था च ब्रह्मलोक
गताथवा॥ अक्षसूत्रधरा देवी पद्मासनगता तथा॥ ॐ तेजोसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानां गायत्री एकपदी द्विपदी त्रि
पदी चतुष्पदी॥ नमस्ते तुरीयाय दर्शतत्वाय पदायपरोरजसे॥ एवं ध्यात्वा यजेद्देवीं गायत्रीं परमाक्षरीं॥ पुनर्ध्यात्वा यंत्रपीठे पुष्पं दद्याद्ध
रानने॥ आदौ त्रिकोणं विन्यस्य षट्कोणं तद्बहिर्न्यसेत्॥ ततो वा अष्टदलं पद्मं तद्बहिश्चतुरस्रकं॥ चतुर्द्वारसमायुक्तं सावित्रीयंत्रमीरितं॥
पीठन्यासादिकं कृत्वा पद्मेन्यस्य च॥ हालाहलादिकं मंत्रं समस्तं परमेश्वरी॥ समुच्चार्य च देव्याद्यं सावित्रीं तेषु तां ततः॥ त्यागात्मके शिवः ३

को २

मनुः पश्चात्तथा विभव विस्तरैः॥ पूजयेद्धृदयेनैव नान्यथा ब्राह्मणः स्मृतः॥ इच्छाभावे वरारोहे पाद्याद्यैश्च तदकान्तकैः॥ पूजयित्वा यजेद्देवीं गायत्रीं
परमाक्षरीं॥ दशभिर्जन्मजनितं शतेन च पुरा कृतं॥ त्रियुगं तत्सहस्रेण गायत्री हंति पातकं॥ महेश वदनोत्पन्ना विष्णोर्हृदयसंस्थिता॥ ब्रह्मणा सम
नुज्ञाता गच्छ देवि यथेच्छया॥ इति मंत्रं समुच्चार्य देव्या वामकरे बुधः॥ समर्पयेज्जपफलं ततः स्तोत्रादिकं पठेत्॥ विधिवज्जपं कृत्वा ततः पुरश्च
रणमीरितं॥ तद्दशांशं हुनेत् साक्षात् पुरश्चरणसिद्धये॥ होमस्य तु दशांशेन तर्पणं तदनंतरं॥ तर्पणस्य दशांशेन अभिषेकं ततः परं॥ अभिषेक
दशांशेन कुर्याद्ब्राह्मणभोजनं॥ ततः सिद्धा भवेद्देवी त्रिवर्गफलदायिनी॥ माहात्म्यं चास्य मंत्रस्य चतुर्वेदेन भाषितं॥ अथ मार्जनमंत्रस्य
प्रकारं शृणु यत्नतः॥ भूर्भुवः शिरसि वा काशी आकाशे भुवि मस्तके॥ मूर्ध्नि भूभोस्तथा काशी आकाशे भुवि मस्तके॥ यजुर्वेदस्तु रेफाः शिरसा मा
र्थवदिनं देवि ऋग्वेदे शृणु शैलजे॥ भूर्भुवः शिरसि वा वर्ण्यं भूमौ अन्यः शिरे तथा॥ भूमौ अन्ये तथा मूर्ध्नि चाय मार्जनमाचरेत्॥ आपो हि ष्ठे
ति ये मंत्रा अष्टाक्षरपदेन तु॥ मार्जनं यत्क्रमेणैव सर्वपापविनाशनं॥ व्यतिक्रमेण चार्वंगि ब्रह्महत्या पदेपदे॥ अतएव क्रमं सर्वं
तव स्नेहात्प्रकाशितं॥ स्तुतिं च कवचं देवि पठित्वा प्रणमेत् सुधीः॥ ॥श्रीदेव्युवाच॥ तुरीयं धाम यो देव परमात्मा स पद्वहि॥ शिवः प्रोक्षि
ते वाहे नमस्कारः कथं भवेत्॥ ॥श्रीशिवउवाच॥ शिरपद्मे महादेव स्त्रावे चपरमो गुरुः॥ नमो नास्ति देवेशि पूज्यो हि गुरुवनत्रयं॥ तद्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नि.तं. ४

यं चिंतये मंत्री बालोऽनुरूचतुष्टयं॥ तद्दशाभावसंभूता ये चान्ये गुरुबीजजाः॥ तथैव ब्राह्मणाः सर्वे वांसा वनान्तरसंस्थिताः॥ यदि देवालये चैतान्
प्रत्यक्षे भावयेत्तदा॥ सहस्रारे महापद्मे तदा चिंतां विवर्जयेत्॥ प्रत्यक्षे दर्शने देवि बाह्येन ब्रह्मचिंतयन्॥ नमस्कारादिकं देवि कुर्यात्साध
कसत्तमः॥ एभ्यो दर्शनमात्रेण नमस्कारादिकं चरेत्॥ न कुर्याद्यदि मोहेन स भवेदापदाश्रयः॥ ब्राह्मणादीन् समालोक्य ब्रह्मचारी यतित्रयं॥
दृष्टिमात्रेण गिरिजे प्रणमेद्दण्डवद्भुवि॥ महापातककर्त्तापि विष्णुर्नो भवति तत्क्षणात्॥ न कुर्याद्यदि मोहेन महापातकवान् भवेत्॥
रक्तवस्त्रं समालोक्य तथा भस्माङ्गभूषणं॥ दण्डहस्तं त्रिशूलं च दृष्ट्वा प्रदक्षिणात्रयं॥ प्रकुर्यात्साधकश्रेष्ठ अन्यथा पातकी भवेत्॥
॥ इति श्रीनिर्वाणतंत्रे तृतीयः पटलः॥ ३॥ ॥श्रीदेव्युवाच॥ सन्यासी कीदृशो नाथ अवधूतश्च कीदृशः॥ कीदृशो वा ब्रह्मचारी
गृहस्थो वाथ कीदृशः॥ ॥श्रीशिव उवाच॥ दिव्यप्रकाशमूर्त्तिं च चिंतयेद्दण्डधारिणं॥ गृहस्थस्यादिव्यमूर्त्तिं वंदनादिविभूषितं॥ सर्व
साविन्नरूपोऽसौ गृहस्थः साधुरूपकः॥ ॥श्रीशिव उवाच॥ शृणु देवि प्रवक्ष्यामि ब्रह्माण्डलक्षणं॥ मेरुपर्वतमध्ये तु सर्व शिव ४
देवाः प्रियं प्रिये॥ महाधीराः नदी तत्र मध्यदेशे सदा स्थिता॥ सुमेरोश्चोर्ध्वदेशे तु सत्यलोकं वरानने॥ अधोभागे महेशानि प्रतिष्ठति
रसातलं॥ एवं क्रमे मेरुमध्ये भुवनानि चतुर्दश॥ पातालसप्तकस्योर्ध्वे ब्रह्मपद्मं सुरेश्वरि॥ अधोवक्त्रं हि तत्पद्मं धरामध्ये चतुर्दलं॥ प

द्ममध्ये बीजकोषे क्षितिचक्रं मनोहरं॥ वलयाकाररूपेण समुद्राः सप्त संस्थिताः॥ जम्बुद्वीपं मध्यदेशे चतुष्कोणं मनोहरं॥ त्रिकोणं मदनागारं कंदर्प
श्चाधिदेवता॥ ऐं क्लीं बीजं द्विदलं रूपं गजेन्द्रवाहनं शिवे॥ त्रिकोणे मदनागारे बिन्दुरूपो महेश्वरः॥ माया शक्तिर्महेशानि भुजंगाकाररूपिणी
॥ तथैव वेष्टितं लिंगं सार्द्धत्रिवलयाकृतिः॥ लिंगच्छिद्रं स्ववक्त्रेण समाच्छाद्य स्थिता सदा॥ ऐं क्लीं बीजं वरारोहे लिंगस्य वामदेशके॥ सुमेरुर्ब्र
ह्मसदनं नादोपरि सुसुन्दरं॥ तत्रैव निवसेद्ब्रह्मा सृष्टिकर्त्ता प्रजापतिः॥ वामभागे च सावित्री वेदमाता सुरेश्वरी॥ तस्याः प्रसादमासाद्य सृष्टिं
वितनुते सदा॥ सरूपं ब्रह्मसदनं लक्षयोजनविस्तृतं॥ तत्सर्वं परमेशानि क्रमेण वेदा मयोदितं॥ त्रिकोणं परमेशानि त्रिमण्डितमकोष्ठका
॥ तदेव पर्वतश्रेष्ठः सर्वदेवाश्रयं हितं॥ त्रिकोणमध्ये तद्बाह्ये पश्चात्सर्वं वरानने॥ स्थावरं पर्वतं पश्य कीदृक्पशुमनुत्तमं॥ रत्नगर्भाधि
कं देवि नास्ति किं पृथिवीतले॥ त्रिकोणे बाह्ये गिरिजे पर्वतं वक्ररूपकं॥ नीलाचलं मंदरं च पर्वतं चन्द्रशेखरं॥ हिमालयं सुमेरुं च मल
यं भस्मपर्वतं॥ चतुष्कोणे वसेद्देवि पर्वतं तत्र कुलाचलं॥ एते चांशिखरराजान् पर्वतं वक्ररूपकं॥ नानादेवालयं देवि तथैव दानवालयं
॥ तृणगुल्मलतावल्ली नानारूपाणि तत्र वै॥ पापिष्ठास्तत्र देवज्ञाताः क्रमयोगेन पार्वति॥ ज्ञायंते प्रियते च पूर्वोक्तेनैव वर्त्मना॥ ॥इति
निर्वाणतंत्रे योगविवरणं नाम चतुर्थः पटलः॥ ४॥ ॥श्रीशिव उवाच॥ पतन्त्यस्योर्ध्वदेशे भी [illegible] मास्यं पंकजं शुभं॥ पत्रषट्कं तथा

नि.तं. ५

तं चतुर्द्वारविभूषितं॥ पद्ममध्ये बीजकोषे भुवर्लोकं मनोहरं॥ सिंदूरसदृशं रक्तवर्णेन शोभितं सदा॥ सिंदूरारक्तवस्त्रेण निर्मितं चक्रपाणि
ना॥ तस्योर्ध्वे निवसेद्विष्णुः श्रीवाणी वामदक्षिणे॥ ब्रह्माण्डं जनलोकं पालयते चक्रपाणिना॥ वैकुंठनामनगरं तत्त्वसंज्ञानादेवालयं
हितं॥ वैकुंठस्य दक्षभागे गोलोकं सर्वमोहनं॥ तत्रैव राधिका देवी द्विभुजा मुरलीधरा॥ नारदाद्यैर्मुनिगणैः सेवितं वेदपारगैः॥ वैकुंठसदृशं
स्थानं नास्ति ज्ञाने च मामके॥ अत्र मध्ये तथा बाह्ये यथा सर्वं प्रपश्यति॥ तथैव भूमिगाः सर्वे ज्योतिषं परिपश्यति॥ नानाभोगयुताः सर्वे
नानारत्नेन भूषिताः॥ इन्द्राद्या देवताः सर्वे तिष्ठन्ति स्तुतिहेतवे॥ महासत्त्वमयं लोकं वेदवाक्यविराजितं॥ पीताम्बरं शान्तमूर्त्तिं वनमालाविभू
षितं॥ एवं भक्तजनं सर्वं वैकुंठे चोपशोभितं॥ विष्णुशब्दं विष्णुगणं वैष्णवं विष्णुरूपकं॥ विष्णुगानं विना नास्ति वैकुंठे परमेश्वरि॥ यद्रूपं गो
लकं धाम तद्रूपं नास्ति मामके॥ ज्ञाने वा वाक्पथे किं वा ध्यानयोगे न विद्यते॥ शुद्धसत्त्वमयं देवि नानादेवेन शोभितं॥ तत्रैव भाति कैलास
स्तत्रैव ब्रह्मणः पुरं॥ वैकुंठनगरं तत्र तत्रैव रविमालयं॥ चंद्रालयं हि तत्रैव कंदर्पनिलयं प्रिये॥ सर्वदेवालयं तत्र देवकन्यादिशोभितं॥ मध्यदे शिव ५
शे गोलकाख्यं श्रीविष्णोर्भोगमंदिरं॥ श्रीविष्णोः सत्त्वरूपस्य यत्स्थलं विश्वमोहनं॥ तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेऽधुना॥ यत्रैव सततं भा
ति द्विभुजो मुरलीधरः॥ निराकारो महाविष्णुः साकारो विश्वरक्षणे॥ यदा साकाररूपोऽसौ तदैव मुरलीधरः॥ तदा सत्त्वमयो विष्णुर्भवनं पाति नि

षितं॥ वैकुण्ठस्य महायोगं सर्वदैव परमेश्वरि॥ इति स्थानस्य माहात्म्यं संक्षेपेण मयोदितं॥ विस्तरेण न शक्नोमि जन्मांतरशतेन च॥ बीजकोषस्य वा
ह्ये तु वेष्टितं तोयमंडलं॥ प्रमाणं सुंदरं तोयं यथा क्षीरोदसागरं॥ धुलसज्ज्योतिराकारं कोटिचन्द्रसमद्युतिं॥ वलयाकाररूपेण सुशुभ्रं तोयमंड
लं॥ गंगादिशाखिनः सर्वास्तत्रैव भांति सुंदरि॥ इन्द्रादिदेवताः सर्वे नृत्यमाना निरंतरं॥ गंधर्वयक्षनागादि क्रीडाडम्बरवाक्तथा॥ वेदगानेन भासंते
मूर्त्तिमंतः सदैव हि॥ मालवेन वरागेन सामगानेन सदा प्रिये॥ मल्लारेण सदाथर्वं वसंतेन तथा पुनः॥ हिंदोलेन यजुःपाठं सदा कुर्वन्ति वेधसः॥ कर्णा
टेनैव कृष्णे च श्रीरागेण तथा शिवे॥ निर्दिष्टः पाठभेदस्तु श्रुतिनिर्दिष्टमतः परं॥ तत्रैव वर्त्तते रागाः सहस्राणि च षोडश॥ तत्रैव भांति तालाश्च सहस्रा
णि च षोडश॥ मुरारेर्मुरलीगानात्सर्वे तालाः प्रजायते॥ तेन तालेन रागेण सदा गायंति वेधसः॥ तद्रागस्य विभागं हि कुर्वन्ति मुनयो जनाः॥ वदंति मुरलीगानं कृतं
वाद्यध्वनेर्वशक्तिस्तत्र संततं॥ नानाधातुप्रसूनेन भूषितं मुरलीधरं॥ तत्रैव राधिका देवि नानारसविलासिनी॥ एवमानंदसंयुक्ता महावेशविलासिनी॥ वामभागे
तु प्रमोहनं॥ येन शब्देन कामस्य उत्पत्तिर्जायते सदा॥ तद्रागश्च वतन्नालं कुहुगानं प्रयत्नतः॥ तव भक्तियुता सत्ता अथवा भक्तिसंयुता॥ गो
सदा भाति राधिका भक्तवत्सला॥ प्रार्थनैकं प्रकुर्वन्ती राधिका भक्तिसंयुता॥ ॥श्रीराधिकोवाच॥ तदेतस्य विशेषेण यद्य
लोकस्थं महाविष्णुं द्विभुजं मुरलीधरं॥ सदानंदयुतं देवं मम संगे विराजितं॥ एवं ध्यायंति ये मर्त्यास्तेषां पापं न कीदृशं॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नि॰तं॰ ६

हंतवलं॥५॥ ॥श्रीभगवानुवाच॥ येययामां भजन्त्येव तेन मार्गेण सकृतिं॥ दास्यामि पूर्णं चार्वंगि सदा त्वं भक्तवत्सला॥ आदौ राधां ततः कृष्णं
दास्यामि नात्र संशयः॥ गुरुणा भाव मार्गेण मंत्र मार्गेण चैव हि॥ ये जना मां भजन्त्येव ते नरा मम सम्मताः
जल्पंति ये च मानवाः॥ ते यान्ति सततं दास्यामि नात्र संशयः॥ भक्त्या वाप्यथवाभक्त्या जल्पन्ति युगलं यदि॥ तव
सदा॥ या नारी सा मम देह भजन्ते पुरुषं सदा॥ त्वल्लमास्ता सदा नारी ज्ञाय ते नात्र संशयः॥ सत्यं सत्यं पुनः सत्यं सत्यं सत्यं हि राधिके॥ इति श्रुत्वा च सा दे
भक्त्या श्रुदास्यामि सततिं पूर्णराधिके॥ एवं ज्ञात्वैव गच्छंति कदा वियम मंदिरे॥ विष्णुलोकमिदं देवि वायुवंशगणं च जनः॥ ॥इति निर्वाणतंत्रे पंचमः
वीराधिकायैव च सका॥ अत्र देशे तु महाविष्णो कामबाणेन पीडिता॥ पद्मस्थं पत्र्मेव दुर्लभं॥ दशपत्रं नीलवर्णं सजलं घनरूपकं॥ तादिफांतैः सर्वेद्रं पद्मं वक्
पटलः॥५॥ ॥श्रीशंकर उवाच॥ एतत्पद्मस्योर्द्ध देशे महापद्मसुदुर्लभं॥ दशपत्रं नील वर्णं सजलं घनरूपकं॥ तादिफांतैः सर्वेद्रं पद्मं वक्र
वाति शोभितं॥ तन्मध्ये वीजकोशेन विलसंति सततं वह्निवीजं सुसिद्धं भवाद्येतं त्रिपुरारौ नवतपननिभं स्वस्ति कं तत्रिभागे॥ स्वर्लोकाख्योभि
दं देवि सर्वदेवैः सुपूजितं॥ साकारं वह्निवीजं च मदेव मेशवाहनं॥ रुद्रात्म्यं हितत्रैव महामोहस्य नाशनं॥ भद्रकाली महाविद्या वाम भागे
सुशोभिता॥ भद्रकाली महाविद्या सदा संहारकारिणी॥ ब्रह्माणा सृज्यते लोकः पाल्यते विष्णुरूपिणा॥ परदेवो रुद्ररूपः सदा संहारकारकः॥
संहरेद्रुद्ररूपेण भद्रकालिकया सह॥ रुद्रस्य भावना देवि किं न सिद्धति चंडिके॥ यद्रूपं कथितं पूर्वं गोलकं सर्वमोहनं॥ तस्माद्धि सर्वतो भावे शिवः ६
रुद्रलोके वरगुणं॥ रुद्रलोकं महास्वर्गं गोलोकाद्देवगुर्गुणं॥ मल्ल मोक्षप्रदं नित्यं रुद्रभस्मांग भूषणं॥ भद्रकाली महाविद्या रुद्रस्य वामदेश

के विष्णुना पाल्यते यद्वत्काली रूपेण भुज्यते॥ अतः काली महादेवी सदैव मुरलीधरः॥ आराध्य वाक्पतेनैव कुंठाधिपति र्भवेत्॥ गो
लोकाधिपति र्देवि स्तुति भक्तिपरायणः॥ कालिकायाः प्रसादेन सभवेत्लोकपालकः॥ लोकानां रक्षणार्थाय सश्री को मुरलीधरः॥ स
माराध्य भद्रकाली गोलोके निवसेत्सदा॥ प्रसादं कालिकायाश्च भुञ्जते विष्णुना सदा॥ अतश्च पालको विष्णु र्महासत्त्वपरायणः॥ इ
इति निर्वाणतंत्रे षष्ठः पटलः॥६॥ ॥श्रीशंकर उवाच॥ एतत्पद्मस्योर्द्ध देशे विमलं पद्मसुंदरं॥ शोभितं द्वादशैः पत्रैः शोणं बंधूक सं
न्निभं॥ वांकांतैर्दिरक्तफुल्लं दत्तुवासिंदूरसोदरं॥ पद्ममध्ये वीजकोषे षट्कोणं मंडलं शुभं॥ मंडलस्य मध्यदेशे वायुवीजं घनोदरं॥ सजीवं वायु
वीजं च वेदवाहु विराजितं॥ लोकत्रयस्य ईशानं ईश्वरं सर्वपूजितं॥ यावि द्याभुवनेशानि त्रिषु लोकेषु पूजिता॥ ईश्वरस्य वाम भागे सा
देवी परितिष्ठति॥ महर्लोकमिदं भद्रे पूजाख्यानं सुरेश्वरि॥ अत्रैव मानसं याग कुर्वं स्तेयोगविन्नमः॥ सिंदूरार कवाग्नि स्फर्श
के वि शितं ततः॥ अतश्चानवा सर्वे ज्योतिषं परिपश्यंति॥ सर्वाय यवं सुस्ता देवाग्नि इंति संततं॥ भूमिगाः पुरिपयंति वक्रा कारं हितेजसं
॥ स्वर्लोकगामिनः सर्वे स्वर्गं तिष्ठंति पार्वति॥ भूर्लोके निवसेद्ब्रह्मा भुवर्लोके जनार्दनः॥ स्वर्लोके निवसेच्छंभुः सदा संहारकारकः॥
ब्रह्मादीनां च ईशानः सर्वकर्त्ता च ईश्वरः॥ सर्वस्वामी स्वरूपश्च सर्वकर्त्ता सुरेश्वरः॥ सृष्टिस्थितिलयादीनां कर्त्ता च परमेश्वरः॥ गोलो

कं कथितं देवि यद्रूपं शोभितं सदा॥ तस्माच्छत गुणं देवि महर्लोकं सुसुंदरं॥ विस्तीर्णं च शतगुणं सर्वं शतगुणं शिवे॥ महर्लोकस्य माहात्म्यं किं
वक्तुं शक्यते मया॥ गोलोकस्य शतगुणं सर्वत्र परमेश्वरि॥ महर्लोके वसेद्धोहिसा मान्य भाव तत्परः॥ तस्माद्देवशतं शोकं गोलोकं मुरली
धरं॥ तदाज्ञा प्राप्य सहसा स्तूयते पद्मयोनिना॥ तदाज्ञया पाति लोकान् हि धुज्ञो मुरलीधरः॥ एवं हि रुद्ररूपेण संहरत्यखिलं जगत्॥
सर्वकर्त्ता यतो देवि अतः स परमेश्वरः॥ ईश्वरः सर्वकर्त्ता च निर्गुणश्चाचलः शिवः॥ भुवनेशी विना देवि स्थंदितुं नैव शक्यते॥ पंगुप्राय:
सदा ईशो गामितुं न हि शक्यते॥ भुवनेशी समाराध्य सर्वस्वामी सईश्वरः॥ अतएव महेशानि तत्त्वे च मोक्षदायिनी॥ विश्वमाता च सा देवि
विश्वमाता च सा देवी विश्वपालनकारिणी॥ मोक्षदा सर्वलोकानां मुक्तिदा विश्वमातृका॥ भुवनेशी विना ईशः किंचित्कर्तुं न शक्यते॥ अ
तएव हि सा देवी मोक्षदा सर्वरूपिणी॥ इति ते कथितं किंचित्तु महर्लोकस्य लक्षणं॥ समासेन परेशानि अथान्यच्छृणु सादरं॥ ॥इति नि
र्वाणतंत्रे सप्तमः पटलः॥७॥ ॥श्रीशंकर उवाच॥ अस्योर्द्धे निर्मलं पद्मं सर्वमोहनकारणं॥ षोडशैः पत्रकैर्युक्तं मोहांधकारनाशनं॥ पद्म
मध्ये यथा वह्निस्तथा ज्योतिर्मयं प्रिये॥ पद्ममध्ये वराटे च जनलोकं सुसुंदरं॥ महामोहांधसमनं नन्दवाह्ये चन्द्रमंडलं॥ देवदेवेंगाय केथ
मुनिभिः परिशोभितं॥ गोलोकस्य लक्षगुणमिह स्थानं सुदुर्लभं॥ देवत्वं च मनोज्ञं च विस्तीर्णं च तथा पुनः॥ सर्वं लक्षगुणं देवि गोलोकान्ना शिव ७

त्र संशयः॥ वीजकोशे मणिद्वीपे षट्कोणे यंत्रमुत्तमं॥ यंत्र मध्ये तु वृषभं महासिंहार्द्धदेहकं॥ तस्योपरि सदा गौरी दक्षभागे सदाशिव॥ त्रिनेत्रं
पंचवक्त्रं च प्रतिवक्त्रे त्रिलोचनं॥ विभूति भूषितांगश्च रजताचलसोदरः॥ व्याघ्रचर्म धरो देवो मणिमाला विभूषितः॥ लोकानामिष्टदाता च लोको
नां भयनाशनः॥ लोकानां मुक्तिजनको लोकानां ज्ञानदायकः॥ आराधकस्य तुल्यत्वं दायको विष्णुपूजितः॥ सदानन्दकरो देवो अर्द्धना
रीश्वरो विभुः॥ क्वचिज्ज्योतिर्मयो देवः क्वचिदाकारवर्जितः॥ देवानां पूज्य रूपश्च देवानां स्वामिरूपकः॥ भक्तस्य मुक्तिदो नित्यो विष्णुत्वदाय
कः प्रभुः॥ विल्वपत्रे पूजकस्य निजस्था स्त्र दायकः॥ गोलोकाधिपतिं हत्वा भक्तेरक्षति यः शिवः॥ तस्य देवस्य माहात्म्यं किं विस्तारेण चंडिके॥
वामभागे सदा गौरी सुमेरुरूपधारिणी॥ त्रिगुणा सा महागौरी गुणैके न विना कथं॥ तस्याः संगसमासाद्य सर्वकर्त्ता सदाशिवः॥ ॥इति नि
र्वाणतंत्रे अष्टमः पटलः॥८॥ ॥श्रीशंकर उवाच॥ एतत्पद्मस्योर्द्ध देशे ज्ञानपद्मं सुदुर्लभं॥ पत्रद्वयसमायुक्तं पूर्णचन्द्रस्य मंडलं॥ पद्ममध्ये
वीजकोषे सारेखितं मणिपुरी॥ तन्मध्ये नवकोणं च यंत्रं परमदुर्लभं॥ वायुवीजं हि तन्मध्ये साकारं हंसरूपिणं॥ हंसः परं ब्रह्मरूपः साकारः शिवरू
पकः॥ नारश्च कुर्वते हेहेति निगमागमपक्षवान्॥ शिवशक्तिपदद्वंद्वं बिन्दुत्रय विभूषितं॥ विहारश्चास्य हंसस्य व्योमपंकजभूरिजे॥ एवं हंसमणि
रूपेन स्यात्को डेऽपरः शिवः॥ वाम भागे सिद्धकाली सदानंदस्वरूपिणी॥ तस्याः प्रसादमासाद्य सर्वकर्त्ता महेश्वरः॥ तपोलोकमिदं भद्रे सर्वदेव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नि॰तं॰ ८ मुहुर्तं वा॥ यत्र ब्रह्मादयो देवा ध्यानयोगं समभ्यसेत्॥ मनसापि न लभ्यन्ते योगे न तपसा न च॥ तपोलोकं गोलकस्य चतुर्लक्षगुणं शिवे॥ ब्रह्मलोके
पुरे देवा वैकुण्ठे च सुरादयः॥ ध्रुवं भुलोके वसेत् ये ये ते च भक्तिपरायणाः॥ तपसापि न लभ्यन्ते तपो लोकं महःशिवे॥ तपोलोकसमो नास्ति लोकमध्ये
सुलोचने॥ सालोक्यादि महर्लोके सारूप्यं जनलोकके॥ सायुज्यं तपलोके सुनिर्वाणं हि नहृध्वके॥ अतो ब्रह्मादयो देवाः तपोलोकार्थिनः सदा॥ न
स्वलोकस्य माहात्म्यं मया वक्तुं न शक्यते॥ इति ते कथितं कान्ते स्वर्गखण्डस्य लक्षणं॥ यज्ज्ञानादमरत्वं च जीवन्मुक्तश्च साधकः॥ यज्ज्ञा
नाज्जननीगर्भं न विशन्ति कदाचन॥ श्रुत्वा तेषां च संप्राप्नोति न संशयः॥ पुराणानि च सर्वाणि अथैकोक्तानि पार्वति॥ परतः परतन्त्र
ध्येयाकाररूपो न विद्यते॥ अष्टज्ञानं च तन्मध्ये अतः किंचिन्न बुध्यते॥ एवं हि वेदशास्त्रेषु आगममध्ये सुलोचने॥ शब्दज्ञानं यतो नास्ति अतः किंचि
न्न बुध्यते॥ अष्टादश पुराणानि सांगवेदांश्च यो नरः॥ तत्त्वाख्याने पुराणानि सदा श्रवणमाचरेत्॥ ब्रुवके वाल्पपावक्षेत्रे न श्रोतव्यं कदाचन॥
शास्त्रस्य लक्षणं देवि न व्याख्या वान्यत्र काशते॥ शब्दब्रह्मस्वरूपश्च मम वक्त्राद्विनिर्गतः॥ संदेहो नैव कर्त्तव्यो यदि ह किं प्रयच्छति॥ संदे
हात्यामरौयाति शेरवं पितृभिः सह॥ ज्ञानं च निर्मलं कृत्वा बुद्धिं च निर्मलां ततः॥ महाभक्तियुतो भूत्वा सर्वप्राणिहिते रतः॥ शास्त्रब्रह्म
मयं ज्ञात्वा श्रुणोति तं त्रकं यदि॥ तदा मुक्तिमवाप्नोति सत्यं सत्यं न संशयः॥ अष्टादशपुराणानि श्रवणे च यत्फलं॥ चतुर्वेदानि स शिव ८

गानि श्रवणेनैव यत्फलं॥ मेरुतुल्यं सुवर्णं च गुरवे ब्राह्मणे पिणे॥ सशस्यां पृथ्वीं शानि सप्तद्वीपां वसुंधरां॥ ब्रह्मादयो भक्तिभावेन यदि स्याद्देहपा
रगो॥ तस्माद्धे परमेशानि फलं वक्तुं धिशिवे॥ अस्य तन्त्रस्य चार्वंगि श्रवणे निपटलं यदि॥ तत्फलात् कोटिगुणितं फलं स लभते ध्रुवं॥ ध
इति निर्वाणतन्त्रे नवमः पटलः॥ ९॥ ॥श्रीदेव्युवाच॥ ज्ञानपद्मस्योर्द्ध्वदेशे सहस्रदलपंकजं॥ अधो वक्त्रं महापद्मं सुमेरोर्मूर्ध्नि सं
स्थितं॥ यस्य पत्रं महेशानि सर्वशक्तिसमन्वितं॥ शुक्लं रक्तं तथा पीतं कृष्णं हरितमेव च॥ विचित्रं चित्ररूपेण नानावर्णेन शोभितं॥ पुष्प
क्षणात् क्षणाद्रक्तं क्षणात् पीतं सुशोभनं॥ कस्मिन् क्षणे सुक्लवर्णं हरितं वर्णमुत्तमं॥ चित्ररूपं च चार्वंगि धत्ते कस्मिन् क्षणे प्रिये॥ ए
वं नानाविधैर्देवि तत्पद्मं शोभितं सदा॥ पद्मे च गोलकं धाम श्रुतिपत्रे तथैव हि॥ गोलकाधिपतिस्तत्र भक्तिभावपरायणाः॥ कैला
साधिपतिर्देवि ध्यानयोगं सदाभ्यसेत्॥ एवं ब्रह्मादयो देवा ॥ शास्त्रे दशोर्ध्वगाः॥ स्तुतिभक्तिपराः सर्वे दिव्यभावैः सदा स्थिताः॥ लक्ष
लक्षं महेशानि तत्रैव सुरलीश्वरं॥ शतलक्षं शिवं तत्र ब्रह्माण्डानां च प्रिये॥ प्रत्यहं परमेशानि ब्रह्माण्डावरदो भवेत्॥ तन्मध्ये स्थापयेद्ब्रह्माण्डं तत्रैव
कमलापते॥ शिवं वज्रविधाकारं तत्रैव स्थापनं चरेत्॥ एवं हि परमेशानि नानाशक्तिं प्रविन्यसेत्॥ प्रतिब्रह्माण्डमध्ये तु ब्रह्मादिदेवतात्रये॥ नानु
शक्तियुतं कृत्वा ब्रह्माण्डं स्थापनं चरेत्॥ ब्रह्मपद्मे पृथिव्यां तु वर्त्तते मानुषादयः॥ ते सर्वे देवि ब्रह्माण्डात् तन्मध्ये भुवनानि च॥ पातालसप्तकं तत्र तत्रे

नि॰तं॰ ९ वत्स्वर्गसप्तकं॥ एवं क्रमेण सर्वे देहे भुवनानि चतुर्दश॥ इति देहं परेशानि ब्रह्माण्डं नात्र संशयः॥ कथितं वाह्यदेशस्य ब्रह्माण्डस्य च लक्षणं॥ य
न्मध्ये वर्त्तते साक्षाद्भुवनानि चतुर्दश॥ तदेव विग्रहं देवि महाब्रह्माण्डमध्यगं॥ एवं बहुविधं देवि तत्र ब्रह्माण्डकोटिशो॥ हृत्पद्मब्रह्माण्डमध्ये सर्वं त
न्मध्ये वर्त्तते साक्षाद्भुवनानि चतुर्दश॥ एवं वहुविधं देवि तन्मध्ये भुव
पिप्पलः धारिणः॥ पृथिव्यां तेषिवर्त्तन्ते जन्तोरा कारविग्रहाः॥ महाब्रह्माण्डमध्ये तु हृत्पद्मब्रह्माण्डनिष्ठति॥ तन्मध्ये जन्तवो देवि तन्मध्ये भुव
नानि च॥ सृष्टिमार्गेण भेदोस्ति स्थूलसूक्ष्मादिभेदकः॥ महाब्रह्माण्डके यद्यत्प्रकारं परमेश्वरि॥ तत्तत्सर्वं हि देवेशि हृत्पद्मब्रह्माण्डमध्यतः॥ तेन
नास्ति सृष्टिमार्गे तु भेदो नास्ति सुनिश्चितं॥ स्थूलसूक्ष्माहि वावीति भेदकं परिवारकः॥ पद्ममध्ये बीजको
रूपे देहमध्ये भुवनानि चतुर्दश॥ सृष्टिप्रकारे ब्रह्माण्डे भेदो नास्ति सुनिश्चितं॥ स्थूलसूक्ष्माहि वावीति भेदकं परिवारकः॥ पद्ममध्ये बीजको
षे भुवनानि चतुर्दश॥ स्थानं च ज्ञविधाकारं सर्वदेवस्य चाश्रयं॥ तन्मध्ये सत्यलोकं च महतत्त्वस्य कारणं॥ दशकालेन स्वर्लोकं निर्मितं
वक्रपाणिना॥ दिक्षु तोयमण्डलं च यथा पूर्णेन्दुमण्डलं॥ परितः पारिजातानि मध्ये कल्पद्रुमं पुनः॥ कल्पद्रुमस्य निकटे ज्योतिर्मंदिरमुत्तमं
॥ उद्यदादित्यसंकाशं चतुर्द्वारविभूषितं॥ मन्दवायुसमायुक्तं गंधपुष्पैरलंकृतं॥ तन्मध्ये वेदिकां देवि रत्नसिंहासनं प्रिये॥ महाकालीवप
॥ उद्यदादित्यसंकाशं चतुर्द्वारविभूषितं॥ मन्दवायुसमायुक्तं गंधपुष्पैरलंकृतं॥ तन्मध्ये वेदिकां देवि रत्नसिंहासनं प्रिये॥ महाकालीव शिव ९
रमाचन्द्राकाररूपतः॥ मायया छादितात्मानं तन्मध्ये समभागतः॥ महत्तत्त्वस्वरूपाणां महाविष्णुः स एव हि॥ महाब्रह्मस्वरूपात्मा नाम मा
त्रविभेदकः॥ एकमूर्त्तिस्त्रयो नाम्ना ब्रह्मविष्णुमहेश्वराः॥ नानाभावेन नो यस्य तस्य मोक्षो न विद्यते॥ ब्रह्माण्डास्तत्र जायन्ते लक्षलक्षं सुलो

चनेत्र ब्रह्मा च विष्णुहरिस्तत्र रुद्रः प्रविन्यसेत्॥ एवं ब्रह्माण्डनिर्माणं कृत्वा विष्णुर्मनातनः॥ सत्जीवं मूर्त्तिं निर्माय यथा यत्र तोऽथ विग्रहं॥ एवं ब्रह्माण्डविविधं
नित्यं सृजति निर्गुणः॥ निर्गुणो वि सुरूपश्च सिद्धिकारणमेव हि॥ केचिद्वदन्ति सद्ब्रह्म केचिदिष्णुः प्रकथ्यते॥ केचिद्रुद्रो महाधूर्वं एकादेवी निरंजनः
॥ आद्याशक्तियुतो देवः स्वनकाकाररूपकः॥ इन्द्रजालस्य दीपाभं वहृक्त्याग्निरूपकः॥ महाज्योतिर्निराकारः सुदग्धवायगोलकां॥ सत्यलोके वीज
कोशे विन्नामणिगृहे शुभे॥ ध्यायेन्निरंजनं देवं रत्नसिंहासनोपरि॥ तस्यान्तिके निजगुरुं पूजाध्यानपरायणं॥ सकान्तमत्र ये देवं रंजनाव लोमोदरं॥
सुवक्त्रां चारुवदनां सुप्रकाशस्वरूपिणीं॥ एवं कान्तयुतं देवं त्वमूर्त्ति स्वांचिविचिन्तयेत्॥ यथा दर्पणगर्भे तु परिपश्यन्ति सर्वतः॥ सहस्रारे महापद्मे तथा
द्वं विचिन्तयेत्॥ परं ब्रह्मालयं देवं तत्परं मोक्षालयं प्रिये॥ निर्गुणस्यालयं सा सान्मकाल्यालयं शिवे॥ तथैव च वर्त्तते नित्यो निराकारस्वनिष्कलः॥ यस्य स्व
पवित्रानन्दपरं परजगत्पतिः॥ नित्यानन्दपरा देवी कालीकालप्रकाशिनी॥ आद्याशक्तिर्महाकालि देवनिर्वाणकारिणी॥ जायन्ते च विलीयन्ते यथा
पृथिव्यां प्रलीयते॥ तोयानु बुद्बुदं जातं यथा तोये विलीयते॥ जलजे तदिकुत्यन्नं लीयते च यथा घने॥ तथा ब्रह्मादयो देवाः कालिकायां प्रजायते॥ तथा प्रलि
यकाले तु पुनस्तस्यां प्रजायते॥ शक्तिज्ञानं विना देवि मुक्तिहास्याय कल्पते॥ एकांशेन भवेद्ब्रह्मा यकाशेन जनार्दनः॥ एकांशेन भवेत् शम्भुः कालि
कायाः सुलोचने॥ अपरा सा महाकाली नघादीनां समुद्रवत्॥ गोष्पदेव यथा तोयं ब्रह्मादयो देवतास्तथा॥ गोष्पदः किं विजानीयात् समुद्रस्य जलं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

नि. तं. १० शिवोत्तेन यथा नाना चंति विसुः किं वेत्ति शांकरः॥ सृष्टिकर्तृ यदा काल्यात न्यत्ते च स्थुरादयः॥ तथा प्रलयकाले तु पुनस्तस्यां प्रलीयते॥ अतो नि
र्वाणदा काली पुरुषः स्वर्गदायकः॥ दक्षिणस्यां दिशि ध्याते संस्थितश्च रवेः सुतः॥ काली नाम्ना पलायन्ते भीतियुक्तः समन्ततः॥ ततः सा दक्षिणा
नाम्ना त्रिषु लोकेषु गीयते॥ पुरुषो दक्षिणः प्रोक्तो वामा शक्तिर्निगद्यते॥ वामया दक्षिणं जित्वा महामोक्षप्रदायिनी॥ अतः सा दक्षिणा नाम्नी
त्रिषु लोकेषु गीयते॥ निर्गुणं पुरुषं कालात् स्रष्टुं नैव लुप्यते यतः॥ अतः सा दक्षिणा नाम्नी त्रिषु लोकेषु गीयते॥ वैष्णवी श्यामला विद्या कालि
का जगदम्बिका॥ साकाररूपा सा काली वनकाकाररूपिणी॥ हस्तपादादिरहिता सीमवर्ज्याग्निरूपिणी॥ तस्यास्थानं हि तत्सत्यलो
कं वरानने॥ यत्रास्ते सर्वदेवस्य प्रार्थनीयं सदानघे॥ तस्य स्थानस्य माहात्म्यं किं मया कथ्यते ध्रुवं॥ सहस्रदलपद्मस्थे कपत्रे सुलो
चने॥ सहस्रगोलकं धाम स्वतो वक्तुं न शक्यते॥ जन्मान्तरसहस्रेण जिह्वाकोटिशतेन च॥ तद्वक्तुं न हि शक्तोस्मि कपत्रस्थस्य शोभनं॥ अत
स्त्वं हि वरारोहे विरता भव पार्वति॥ किं जल्पमध्ये या शोभा किं वक्तुं शक्यते मया॥ तन्मध्ये कर्णिकां देवि तन्मध्ये बीजकोषकं॥ बीजकोषस्य म
ध्ये तु सुधासागरमुत्तमं॥ लक्षयोजनविस्तारं सुसुभं तोयमण्डलं॥ तन्मध्ये तु मणिद्वीपं सहस्रयोजनं शिवे॥ परितः पारिजातां स्वकदम्बवनमुत्तमं शिवः १०
॥ मध्ये कल्पद्रुमं तत्र ज्योतिर्मन्दिरमुत्तमं॥ चतुर्द्वारसमायुक्तं हेमप्राकारभूषितं॥ मन्दवायुसमायुक्तं गंधपुष्पसमन्वितं॥ देवकन्यासहस्राणि प

रिचर्यापरायणाः॥ तन्मध्ये वेदिकां देवि पंचाशदक्षरान्विकां॥ तस्योपरि महेशानि रत्नसिंहासनं शिवे॥ महाकाली महाकृष्णघनकाकाररूप
कं॥ इन्द्रजालस्य दीपाभं महाज्योतिः सनातनः॥ इति ते कथितं कान्ते मम स्वर्गक्रमेण हि॥ अत्यागोप्यं यत्नेन न प्रकाश्यं कदाचन॥ अतिस्ने
हेन देवेशि तव स्थाने प्रकाशितं॥ सर्वपापप्रणाशाय युक्तो विस्तारेण हि शक्यते॥ ॥इति श्रीचंडिकाशंकरसंवादे निर्वाणतंत्रे सत्यलोककथ
नं नाम दशमः पटलः॥१०॥ ॥श्रीचंडिकोवाच॥ त्वत्प्रसादात् महादेव पवित्राहं न चान्यथा॥ इदानीं श्रोतुमिच्छामि तत्त्वज्ञानं सुदुर्लभं॥
श्रीशंकर उवाच॥ तत्त्वज्ञानादिकथने शंकते मम मानसं॥ पतनप्रसंगश्च वरो विरता भव पार्वति॥ येन ज्ञानप्रसादेन विष्णुः सत्त्वगुणाश्र
यः॥ शृणु देवि प्रवक्ष्यामि ब्रह्मा लोकपितामहः॥ तत्त्वज्ञानप्रसादेन शंभुः संहारकारकः॥ अन्ये मुक्ताश्च ये सर्वे तेपि तत्त्वप्रसादतः॥ तत्त्वज्ञानं परे
शानि कथं वा कथ्यते मया॥ विरता भव देवेशि न हि पृच्छ पुनः पुनः॥ इति तस्य वचः श्रुत्वा शांकरी वाक्यमब्रवीत्॥ यदि त्वं महादेव न मे क
थयसि प्रभो॥ प्राणत्यागं करिष्यामि पुरतस्ते न संशयः॥ ॥श्रीशंकर उवाच॥ शृणु देवि प्रवक्ष्यामि तत्त्वं परमदुर्लभं॥ अत्यागोप्यं यत्ने
न त्वयापि वरसुन्दरि॥ मद्यं मांसं तथा मत्स्यं मुद्रां मैथुनमेव च॥ पंचतत्त्वमिदं देवि निर्वाणमुक्तिहेतवे॥ अष्टैश्वर्यं परं मोक्षं मद्यपानेन चो
लजे॥ मांसभक्षणमात्रेण साक्षान्नारायणो भवेत्॥ मत्स्यभक्षणमात्रेण कालीप्रत्यक्षतां भवेत्॥ मुद्रासेवनमात्रेण भूपूज्यो विष्णुरूपधृक्

नि. तं. ११ ॥ मैथुनेन महायोगी मम तुल्यो न संशयः॥ तं ज्ञात्वा रे तु देवेशि यथैव कथितं पुरा॥ माहात्म्यं चास्य धर्मस्य पूर्वैव कथितं मया॥ तत्त्वज्ञानमिदं कान्ते नि
र्वाणमुक्तिकारणं॥ एकत्र पंचतत्त्वानि यत्रैव मिलनं भवेत्॥ तत्रैवाहं प्रगच्छामि तेन रामनसा सदा॥ सा नारी कालिकारूपा मृते तस्यां प्रलीयते॥ ये
न एः साधुरूपा च तत्त्वज्ञानपरायणाः॥ जीवन्मुक्ताश्च ते प्रोक्ता ब्रह्मरूपा न चान्यथा॥ सायुज्यादि महामोक्षं निपुणं सत्क्रियादिषु॥ ब्राह्मणः परमेशा
नि यदि तत्त्वपरायणः॥ सत्यं सत्यं पुनः सत्यं परतत्त्वे प्रलीयते॥ यथा तोयं तोयमध्ये लीयते परमेश्वरि॥ तथैव तत्त्वसेवायां लीयते परमात्मनि॥ इति ते
कथितं कान्ते तत्त्वज्ञानं विमोक्षदं॥ येन ज्ञानप्रसादेन मोक्षसिद्धिर्न संशयः॥ क्षितिं विना यथा नास्ति संस्थितेः कारणं सदा॥ तोयं विना यथा नास्ति
पातालानां कारणं॥ तमो हन्ता यथा नास्ति भास्करेण विनाम्बिके॥ विना वह्निप्रयोगेन यथा किंचिन्न पच्यते॥ विना चंद्रेण देवेशि सुधावृष्टिर्न जाय
ते॥ मातृगर्भं विना कान्ते सुतोत्पत्तिर्न यथा भवेत्॥ तत्त्वज्ञानं विना देवि तथा मुक्तिर्न जायते॥ अतएव महेशानि गोपनं कुरु यत्नतः॥ दिव्यभावयु
तानां च तत्त्वज्ञानं सदा भवेत्॥ वीरभावयुतानां वै तत्त्वसेवं सदानघे॥ पशोरालये कुर्यात् पशोर्ज्ञानगोचरे॥ पशोः सन्निधाने च पशो
र्दृष्टिगोचरे॥ अन्यथा पक्षिकीटस्य दर्शने नैव कारयेत्॥ सिद्धिवर्मभ्रूणप्राज्ञे यत्कृत्वा सिद्धिमाप्नुयात्॥ एकाशक्तिं समानीय एकैव साध शिव
कः सदा॥ पूजयेद्दृढयत्नेन पंचतत्त्वेन कौलिकः॥ एवं कृत्वा लभेत् सिद्धिं नान्यस्य दृष्टिगोचरे॥ श्रीचक्रपूजा यत्रैव तत्रैव धनसिद्धये॥ सिद्धि ११

र्न जायते तत्र कदाचिदन्यसन्निधौ॥ तत्रैव कामनासिद्धिर्यत्र चक्रं प्रपूजयेत्॥ आयुरारोग्यमैश्वर्यं श्रीचक्रपूजनाद्भवेत्॥ कीर्तिर्वृद्धिर्यशोवृद्धिर्मु
क्तिभागी न संशयः॥ वांछासिद्धिर्ज्ञानसिद्धिर्देवाः प्रीतिश्च जायते॥ श्रीचक्रं पूजयेद्यः कुर्यात्तस्य वशं भुवनत्रयं॥ अश्वमेधसहस्राणि वाजपेयश
तानि च॥ दृष्ट्वा यत्फलमाप्नोति तत्फलं कौलिकार्चने॥ वापीकूपतडागादि दत्त्वा यत्फलमाप्नुयात्॥ तत्फलात्कोटिगुणितं यदि चक्रं प्र
पूजयेत्॥ तदन्नं मेरुतुल्यं स्याद्विन्दुः सिन्धुसमोपमं॥ पुष्पं च मेरुसदृशं यदि चक्रं प्रपूजयेत्॥ तन्मध्ये वर्जनं देवि यदि व्याधियुतो नरः॥ शि
वपुष्पप्रपूजो हि श्रान्तितत्र विवर्जयेत्॥ सूर्यस्य प्रतिबिम्बं च तत्तोये परिपश्यति॥ गंगातोये यथा सूर्यं हीनतोये तथा पुनः॥ सूर्यस्य दू
षणं नास्ति सूर्ये कः परितिष्ठति॥ तथैव परमेशानि साधके नास्ति दूषणं॥ मन्त्राराधनमात्रेण तदात्मा तन्मयो भवेत्॥ अतएव म
हेशानि दूषणं नास्ति रेतसि॥ रेतः पवित्रं परमं शक्तिर्मोक्षस्य कारणं॥ पूजाहीना वयाशक्ति जपहीना च या पुनः॥ धृत्वा साधकरेत
श्च सा नारी कालिका स्वयं॥ भ्रान्तिरत्र न कर्तव्या परितुष्टिं प्रयच्छति॥ या नारी भ्रान्तिसंयुक्ता आगता चक्रमंडले॥ सप्तजन्मनि स
नारी चांडाली पतिवर्जिता॥ एवंरूपा च या नारी मवज्ञां कुरुते यदि॥ धनपुत्रविवर्जितश्च स चंडालो न चान्यथा॥ इति ते कथितं कान्ते
तत्त्वज्ञानं विमोक्षदं॥ येषां देहे महेशानि तत्त्वज्ञानं प्रयोदितं॥ पुनर्न जननीगर्भे न विशन्ति कदाचन॥ जीवन्मुक्ताश्च ते प्रोक्ताः शिवरूपाश्च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri





Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

नि॰तं॰ १४

सप्तदशमात्त्वं शेत्रयोदश॥ कांतायाः सप्तमे षष्ठे वल्लक्ष्मीनारायणो भवेत्॥ इति श्रुत्वा वचस्तस्य शिष्यं तं नानुवाच वै वचः॥ यदुक्तं मयि मुस्त्यं ते
नकरोमि निरन्तरं॥ पंचतत्त्वं सदा सेवं कृत्वा ज्ञानं वदस्व मे॥ यश्चैव वर्त्तते दंडी वक्तुं शिष्य समाहृतः॥ तत्र गत्वा प्रयत्नेन पंचतत्त्वविचेष्टया॥ अथवा
वीरमध्ये तु यत्नेन गमनं चरेत्॥ तत्त्वज्ञानि गृहस्थस्य सन्निधाने व्रजेत् किल॥ सूद्रमपि गत्वा यत्रास्ते कुलनायकः॥ भिक्षा चर्यां न चरेतार्थं दे
वीरमध्ये तु यत्नेन गमनं चरेत्॥ तत्त्वज्ञानि गृहस्थस्य सन्निधाने व्रजेत् किल॥ हे मातर्देहि मे भिक्षां कुंडलीनर्पयाम्यहं॥ एवमुक्त्वा ततो दंडी महासंस्या
वनायाः कृते पुनः॥ आचार्यपत्नी दृष्ट्वा तु भिक्षां कुर्यात् समाहितः॥ हे मातर्देहि मे भिक्षां कुंडलीनर्पयाम्यहं॥ एवमुक्त्वा ततो दंडी महासंस्या
रमाचरेत्॥ कुंडाग्निके समानीय होममेधेहि विधिपूर्वकं॥ ततो कृत्वा तु कारं धृत्वा आज्ये रक्षाकृत्वा पुनः॥ विपरीतक्रमेणैव कुर्याद् दंडविशोधणं॥ ततः
कुर्यात्प्रयत्नेन अन्तर्यज्ञोपवीतकं॥ शिखान्ते स्वाशिरवा मंत्रैः पूगमध्ये विनिक्षिपेत्॥ पूतमृत्तिकया पूगं विलिप्य शोधयेत्ततः॥ ततः पूगं मूलमं
त्रेदंडमध्ये विनिःक्षिपेत्॥ पूर्णाहुतिं ततो दद्यात् ततस्तु गमनं चरेत् सुधी॥ यज्ञसूत्रं समहित्वा यां ततः पूगं शोधयेत् प्रिये॥ मूलं मंत्रं जपेत्तत्र गज्ञान्तकास
हस्रकं॥ ततश्च श्रावयेन्मंत्रं कालिकायाश्च सुन्दरि॥ अथवाश्रावयेन्मंत्रं नारायणाः परमदुर्लभं॥ मूलमंत्रं समुच्चार्य पूगमस्मप्रयत्नतः॥ भक्षण
न तत्क्षणात् स्यात् दंडी यज्ञोपवीतवान्॥ भवत्येव न संदेहो नरो नारायणो भवेत्॥ बिल्वदंडं समानीय वंशसेकं समानयेत्॥ बिल्वदंडे कालिका
या जपेन्मंत्रं प्रयत्नतः॥ जीवन्यासं ततः कृत्वा दंडे देवीं विचिन्तयेत्॥ बिल्वस्थितं च चेतन्यं वंशदंडे नियोजयेत्॥ इष्टदेवीस्वरूपेण दं शिव १४

मूलेनयज्ञसूत्रं तु तस्मिन्नेव निवेशयेत्॥५

यसेर

डोयं परमेश्वरि॥ शिष्यस्य दक्षिणे हस्ते दंडस्य स्थानमाचरेत्॥ कमंडलुं समानीय वाम्लं चप्रपूजयेत्॥ वाहणीं निक्षिपेत्तत्र मूलमंत्रं ततो ज
पेत्॥ अष्टोत्तरशतं जप्त्वा तस्य वाम करे न्यसेत्॥ गैरिकं कौपिनं वस्त्रं येन परिधापयेत्॥ दंडधारणमात्रेण नरो नारायणो भवेत्॥ अथवापि महा
मायां दंडे परिविभावयेत्॥ गुरुस्तु जपं महाकालीं दंडे परिविभावयेत्॥ साक्षान्नारायणस्त्वं हि दयाधर्मपरो भव॥ तव माता पिता वापि सर्वं दंडाग्निकेलि
तं॥ वीरवक्रमनं गोहे गृहस्थस्य द्विजस्य वा॥ नारायणं सदा भाव्य द्वारे तस्य व्रजेत् सुधी॥ इति श्रुत्वा गृहस्थश्च पुटाञ्जलिपरो भवेत्॥ द्वारे च दंडि नं दृ
ष्ट्वा प्रणमेत् ब्राह्मणो नरः॥ भिक्षां दद्यात् प्रयत्नेन कुर्मे मांसविनाप्रिये॥ आदाय भिक्षां देवेशि वीरवक्रमनं चरेत्॥ तथाहि नगरं गत्वा त्रिरात्र
मतिं चरेत्॥ तीर्थभूमिं ततो गत्वा सप्तरात्रं वसेत्ततः॥ ब्राह्मणो दंडिनं दृष्ट्वा प्रणमेद्विधिपूर्वकं॥ तोयपूर्णं च देवेशि किंवा मृन्मय कमंडलुं॥ दंडिमात्रेण तत्पा
त्रं पूर्णतोयं भवेद् ध्रुवं॥ दद्यान्न यदि मोहेन स भवेदापदाश्रयं॥ त्रिंशद्वर्षसहस्राणि वनेचरविट्योभवेत्॥ इति ते कथितं चंडि संन्यासधारणं परं॥ पापं
यत्नतः क्वापि प्राणान्तेऽपि कदाचन॥ ॥इति निर्वाणतंत्रे चंडिशंकरसंवादे त्रयोदशपटलः॥१३॥ ॥श्रीशंकर उवाच॥ शृणु देवि प्रवक्ष्यामि अ
